|| ॐ || श्रीः ||

श्री सत्याषाढ गृह्य सूत्र प्रयोगः

द्वितोयो भागः


1. जातकर्म प्रयोगः
2. मेधाजननम्
3. नामकरणम्
4. अन्नप्राशनम्
5. आयुर्वर्धापन विधिः
6. चूडाकरणम्
7. उपनयन प्रयोगः
8. वेद व्रतोपाकरण प्रयोगः
9. वेदव्रतोत्सर्जनम्
10. शुक्रिय व्रतोपाकरणम्
11. शुक्रिय व्रतोत्सर्जनम्
12. समावर्तनम्
13. मधुपर्कः
14. कन्यावरणम् वाग्दानं च
15. वरस्य वधूग्रहगमनम्
16. मधुपर्केण वरस्य पूजा
17. कन्यादानम्
18. माङ्गल्यदारणम्
19. विवाह व्रतम्
20. विवाह होमः
21. पाणिग्रहणम्
22. गृहप्रवेशः
23. गृहप्रवेश स्थालीपाक प्रयोगः
24. औपासन होमः
25. चतुर्थदिन शेषहोमः चतुर्थी कर्म
26. दर्श पूर्णमासस्थाली पाक प्रयोगः
27. ऋतुशान्तिः
28. गर्भाधानम्
29. पुंसवनप्रयोगः
30. गर्भस्रावेस्तंभन विधिः
31. सीमन्तोन्नयन प्रयोगः

**|| जातकर्मप्रयोग: ||**

श्री: || जातमात्रे पुत्रे पिता तस्य मुखं निरीक्ष्य नद्यादौ स्नात्वा | असंभवे शीताभि: अद्भि: सुवर्णयुताभि: गृहे वा (उदङ्मुख:) स्नात्वा सितचन्दन माल्यादिभिरलङ्कृतो-नालच्छेदनात्प्राक् अश्मानं परशुं सुवर्णं सर्षपान्कणांश्च उष्ण शोता अप: गोघृतं उदकुंभं च संभृत्य प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम अस्य कुमारस्य गर्भाबुंपान जनित सकलदोष निबर्हणायुर्वर्चोभिवृद्धि बीज गर्भ समुत्भवैनोनिबर्हणद्वारा श्री परमेश्वर प्रीत्यर्थं जातकर्म संस्करिष्ये | तदंगं गणपतिपूजनं पुण्याहवाचनं हिरण्येन पुत्रजन्म निमित्तकं जातकर्माङ्गं नान्दी श्राद्धं च करिष्ये इति सङ्कल्प्य कुर्यात् || ततोश्मनि परशुं तदुपरि हिरण्यं च निधाय तानि व्यत्यस्तानि कृत्वा तदुपरि कुमारं पूर्वं सम्यक्प्रक्षालितं हस्ताभ्यां प्राकूशिरसं धारयति || ओं अश्माभव परशुर्भव हिरण्यमस्तृतं भव | वेदो वै पुत्र नामासि सजीवत्वं शरद: शतम् || अगादंगात्संभवसि हृदयादधि जायसे || आत्मा वै पुत्र नामासि सजीव शरद: शतम् || इति || अञ्जलिनोदकमादायमूर्धानमस्या अवसिञ्चति | तिलदेवपद्यस्वन माँ समसिनोदलमवपद्यस्वस्यात् – इति||

उत्तपनीयमग्निंतु सूतिकागारे संस्थाप्य प्राङ्मुख उपविश्य देश कालौ संकीर्त्यास्य कुमारस्य शंडामर्कादिरक्षोगणेभ्य: संरक्षणार्थं सर्षपमिश्रै: कणै: सायं प्रातरुद्धूपनं भूम्यालंभनं च करिष्ये इति सङ्कल्प्य परिसमुह्य परिस्तीर्य तृष्णीं परिषिच्य हस्तेन जुहुयान्नात्र त्याग: | मन्त्र: - ओं शंडोमर्क उपवीर: शांडिकेर उलूखल: | च्यवनो नश्यतादित: स्वाहा स्वाहा स्वाहा || आलिखन्विलिखन्ननिमिषन्किंव दंत उपश्रुति: स्वाहा स्वाहा स्वाहा || अर्यम्ण: कुंभी शत्रु: पात्र षाणिनिंपुणि: स्वाहा स्वाहा स्वाहा || आन्त्रीमुख: सर्षपारुणो नश्यतादित: स्वाहा स्वाहा स्वाहा || केशिनीश्व लोमिनि बजा बोजोपकाशिनी | अपेतनश्यतादित: स्वाहा स्वाहा स्वाहा || कौबेरका विश्ववासो रक्षो राजेन प्रशिता: | ग्रामान्त्सजातयो यंतीप्सन्त: परिजाकृतान् स्वाहा स्वाहा स्वाहा || एतान्हतैतान्बध्नीतेत्ययं ब्रह्मणो-दूतस्तान् अग्नि: पर्यसरत्त् | तानिन्द्रस्तान्बृहस्पतिस्तानहं वेदब्राह्मण: प्रमृशत: कूटदन्तान्विकेशान्लं-बस्तनान्त्स्वाहा स्वाहा स्वाहा || नत्कंचारिण उरस्पेशाञ्छूलह स्तान्कपालपान्त्स्वाहा स्वाहा स्वाहा || पूर्वएषांपितेत्युच्चै: श्राव्य कर्मक: | माताजघन्यागच्छन्ती ग्रामे विखुरमिच्छन्ती स्वाहा स्वाहा स्वाहा || नत्कंचारिणी स्वसासन्धि नाप्रेक्ष्यते कुलम् | यास्वपत्सु जागर्ति यस्यैविजातायांमन: स्वाहा स्वाहा स्वाहा ||तासांत्वं कृष्णवर्त्मने क्लोमानँहृदयं यकृत् | अग्ने यक्षिणीनिर्दहस्वाहा स्वाहा स्वाहा – इति || एतैरेकादशभिर्मन्त्रैर्निर्धूमेषु नापेन कुमारं उद्धूपयेत् || नात्रत्याग: || तत: पाणीप्रक्षाल्य भूमिमालभते | ओंयत्ते सुशीमेहृदयं दिविचन्द्रमसि श्रितम् | तस्यामृतत्वस्यनो धेहिमाहं पौत्रमघँरुदम् || वेदतेभूमि हृदयंदिविचन्द्रमसि श्रितम् | तथामृतत्वस्ये शानोमाहंपौत्रमघँरुदम् || इति ||

|| **मेधाजननम्** ||

श्रीः | देश कालौ संकीर्त्यास्य कुमारस्य धियोधारण अभिवृद्ध्यर्थं मेधाजनन कर्मणा संस्करिष्ये इति सङ्कल्प्य |

दर्भेण हिरण्यं वध्वा तदन्तर्धाय प्राक्शिरसं कुमारं संस्थाप्य प्रतिमन्त्रं गोघृतं प्राशयति || ओं भूः ऋचस्त्वयि जुहोमि स्वाहा | ओं भुवः यजूँषित्वयि जुहोमि स्वाहा | ओँ सुवः सामानि त्वयि जुहोमि स्वाहा | ओं भूर्भुवः सुवस्थर्वांगिरसः त्वयि जुहोमि स्वाहा | इति || नात्रत्यागः || इति मेधा जननम् |

ततः कुमारं उष्णशीताभिः अद्भिः स्नापयति | मन्त्रः ओं क्षेत्रीयैत्वा निरृत्यैत्वाद्द्रुहोमुञ्चामि वरुणस्य पाशात् | अनागसं ब्रह्मणेत्वा करोमि शिवेतेद्यावापृथिवीउभे इमे | शंते अग्निः सहा द्भिरस्तुशंद्यावा पृथिवीसहौषधीभिः | शं अन्तरिक्षँसह वातेन तेशंते चतस्रः प्रदिशो भवन्तु | सूर्यमृतं तमसोग्राह्यायद्देवा अमुञ्चन्नसृजन्व्ये नमः | एवमहमिमं क्षेत्रियाज्जामिशँसात् द्रुहोमुञ्चामिवरुणस्य पाशात् – इति ||

ततः कुमारं मातुरुत्सङ्गे आदधाति | मन्त्रः -- यादैवीश्चतस्रः प्रदिशो वातपत्नीरभिसूर्योविचष्टे | तासांत्वाजरस आदधामि प्रयक्ष्म एतु निरृतिं पराचैः -- इति ||

ततः कुमारं अभिमन्त्रयते | मन्त्रः --- माते पुत्रँरक्षोहिँसीन्मा धेनुरतिसारिणी | प्रियाधनस्यभूयाएधमानास्वेवशे – इति |

ततः तृष्णीं प्रक्षालितं दक्षिणं स्तनं सव्यं च मन्त्रावृत्त्या पाययति | मन्त्रः --- अयं कुमारो जरान्धयतु सर्वमायुरेतु तस्मै स्तनं प्रप्या यस्वायुः कीर्तिर्वर्चोयशोबलम् – इति |

Commented [r1]: 8-2-21

ततः मन्त्रावृत्त्या उभौ स्तनौ अभिमृशति | मन्त्रः --- नामयति नरुददि यत्र वयं वदामो यत्रवाभिमृशामसि – इति |

ततः अस्याः शिरः समीपे उदकपूर्णं कुंभं पिहितमुखं निदधाति | मन्त्रः -- आपो गृहेषु जाग्रत यथा देवेषु जाग्रथ | एवमस्यैसुपुत्रायै जाग्रथ – इति |

-------- * -------

|| **नामकरणम्** ||

द्वादश्यां माता पुत्रौ स्नातः | शुच्यगारं कुर्वन्ति | इति सूत्रम् |अत्र मातापुत्रयोः पितृश्च त्रयाणां द्वादश्यामेव आशौच निवृत्तिः न तु एकादश्याम् | नामकरणं जन्मतः द्वादशे दिवसमेव कर्तव्यम् |

माता पुत्रयोः पितृश्च स्नानं आगार शुद्धिं च कारयित्वा सुतिकाग्निं बहिः परिहृत्य औपासनमग्निं संस्थाप्य प्राङ्मुख उपविश्य दक्षिणतः कुमार सहितां भार्यां

उपवेश्य आचम्य प्राणानायंय देशकालौ सङ्कीर्त्य अस्य शिशोः बीजगर्भ समुद्भवैनो निबर्हणायुर्वर्चो भिवृद्धि व्यववहार सिद्धि द्वारा श्रीपरमेश्वर प्रीत्यर्थं नामकरणाख्यं कर्म करिष्ये इति सङ्कल्प्य तदङ्गं गणपति पूजनं पुण्याहवाचनं नान्दी श्राद्धं करिष्ये इति उत्करीत्या कुर्यात् | गृह्याग्निं उपसमाधाय व्याहृत्यन्तं कृत्वा | प्रधान होमे मन्त्रः ---- धाता ददातु नो रयिमीशानो जगतस्पतिः | स नः पूर्णेन वावनत् स्वाहा | धात्र इदं न मम || धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान | धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम स्वाहा | धात्र इदं न मम || धाता ददातु नो रयिं प्राचिं जीवातु मक्षिताम् | वयं देवस्य धीमहि सुमतिँसत्य राधसः स्वहा | धात्र इदं न मम || धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे | तस्मै देवा अमृताः सव्ययन्तां विश्वे देवासो अदितिः सजोषाः स्वाहा | धात्र इदं न मम || अनुनोद्यानुमतिर्यज्ञं देवेषु मन्यताम् | अग्निश्च हव्यवाहनो भवतां दाशुषे मयः स्वाहा | अनुमत्या इदं न मम || अन्विदनुमतेत्वंमन्यासैशजनः कृधि | ऋत्वेदक्षाय नोहिनुप्रणआयूँषि तारिषः स्वाहा | अनुमत्या इदं न मम || अनुमन्यतामनु मन्यमाना प्रजावन्तँरयिमक्षीयमाणम् | तस्यै वयँ हेडसिमापि भृमसानोदेवी सुहवाशर्म यच्छतु स्वाहा || अनुमत्या इदं न मम || यस्यामिदं प्रदिशियद्विरोचतेनुमतं प्रति भूषंत्यायवः | यस्या उपस्थ उर्वन्तरिक्षँसानो देवी सुहवा शर्म यच्छतु स्वाहा || अनुमत्या इदं न मम || राकामहँसुहवाँसुष्टुतीहुवे शृणोतु नः सुभगाबोधतुत्मना | सीव्यत्वपः सूच्याच्छिद्यमानया ददातुवीरँ शतदायमुक्थ्यँ स्वाहा || राकाया इदं न मम || यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषेवसूनि | ताभिर्नो अद्यसुमना उपागहि सहस्रपोषँसुभगे रराणा स्वाहा || राकाया इदं न मम || सिनीवालीपृथुष्टुके या देवानामसि स्वसाजुषस्व हव्यमाहुतं प्रजां देविदिदिड्ढिनः स्वाहा || सिनीवाल्या इदं न मम || यासु पाणिः स्वङ्गुरिः सुषुमा बहुसूवरी | तस्यै विश्पत्नियैहविः सिनीवाल्यैजुहोतनस्वाहा || सिनीवाल्या इदं न मम || कुकूमहँसुभगां विद्मनापसमस्मिन् यज्ञे सुहवां जोहवीमि | सानो ददातु श्रवणं पितॄणां तस्यास्तेदेविह-विषाविधेमस्वाहा || कुह्वा इदं न मम || इति ||

ततः इमं मे वरुण तत्वायामि त्वन्नो सत्वन्नो अग्ने त्वमग्ने अयासि प्रजापतेति हूत्वा जयादि होमम् व्याहृत्यन्तं प्रायच्छित्तार्थं केशवादि होमं च कृत्वा त्रिवृदन्न होमं कुर्यात् || मन्त्रः --- अग्नये स्वाहा | अग्नय इदं न मम || सोमाय स्वहा || सोमाय इदं न मम || अग्नयेन्नादाय स्वाहा | अग्नयेन्नादाय इदं न मम || अग्ने अन्नपतये स्वाहा | अग्नये अन्नपतय इदं न मम || प्रजापतये स्वाहा | प्रजापतय इदं न मम || विश्वेभ्यो देवेभ्यः स्वाहा | विश्वेभ्यो देवेभ्य इदं न मम || सर्वेभ्यो भूतेभ्य स्वाहा | सर्वेभ्य भूतेभ्य इदं न मम |सर्वाभ्यो देवताभ्यः स्वाहा | सर्वाभ्यो देवताभ्य इदं न मम || अग्नये स्विष्टकृते स्वाहा | अग्नये स्विष्टकृत इदं न मम || ततः अग्नेरुत्तरतः प्रागग्रान्कुशानास्तीर्य हुतशेषं बलिं करोति | वास्तुतये स्वाहा | रुद्राय वास्तुपतय इदं न मम | तृष्णीं बलिं परिषिच्य पुण्याहवाचनं कुर्यात् |

ततः कर्त्ता अभिमन्त्रयति स्वदक्षिणे विद्यमानस्य मातुरुत्सङ्गस्थस्य शिर्शोदीक्षिणे कर्णे पिता मातेत्यग्रेभि व्याहरेयाताम् | विज्ञायते च मम नाम प्रथमं जातवेद ‖ विज्ञायते च तस्माद्विनाम ब्राह्मणोर्धुकः ‖ इति ‖ ततः पुत्रमभिमृशति --- सोमस्यत्वा द्युम्नेनाभिमृशामि अग्नेस्तेजसा सूर्यस्य वर्चसा ‖ मूर्ध्याभिजिगध्रति – पशूनांत्वा हुंकारेणाभिजिघ्राम्यसावायुषे वर्चसे हूं |

अथास्य दक्षिणेन हस्तेन दक्षिणं हस्तं साङ्गुष्टं गृह्णाति | मन्त्रः | अग्निरायुष्मान्सवनस्पतिभि रायुष्मान्तेनत्वायुषायुष्मन्तं करोमि |

सोम आयुष्मान्स ओषधीभिरायुष्मान्तेनत्वायुषायुष्मन्तं करोमि | यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मान्ते नत्वायुषायुष्मन्तं करोमि | ब्रह्म युष्मतद्ब्राह्मणे रायुष्मत्तेनत्वायुषायुष्मन्तं करोमि | देवा आयुष्मन्तस्ते मृतेनायुष्मन्तस्तेनत्वायुषायुष्मन्तं करोमि |

ततः नामदानम् | दक्षिणे कर्णे – आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः पुनस्ते प्राण आयति परा यक्ष्मँसुवामि ते | अग्नौ पृथिव्यां प्रतितिष्ट वायावान्तरिक्षे सूर्ये | दिविथाँस्वस्तिमग्निर्वायुरादित्यञ्चन्द्रमा आपो न सञ्चरन्ति ताँस्वस्तिमनुसञ्चर ---------- शर्मन् | उत्तरे कर्णे - आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि | घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रं अपिरक्षतादिमम् | अग्नौ पृथिव्यां प्रतितिष्ट वायावन्तरिक्षे सूर्ये | दिवियाँस्वस्तिमग्निर्वायुरादित्यञ्चन्द्रमाः आपो न सञ्चरन्ति ताँस्वस्तिमनुसंचर --------- शर्मन् ‖

‖ **अन्नप्राशनम्** ‖

जन्मतः षष्ठेमास्यष्टमेवादन्तेषु जातेषु वा ज्योतिर्विदादिष्टे मुहूर्ते शुक्लपक्षे पूर्वाह्णे पित्रादिः शिशोरन्नप्राशनं कुर्यात् |

कर्ता कृतमाङ्गलिकः प्राङ्मुख उपविश्य स्वदक्षिणतः संस्कार्य सहितां भार्यांचोपवेश्यदेशकालौ सङ्कीर्त्य ममास्याशिशोर्मातृगर्भ मल प्राशनै नोनिबर्हणबीजगर्भसमुद्भवैनौनिबर्हणद्वारान्नाद्य ब्रह्मवर्चस तेजैन्द्र यायुरभिवृद्धिद्वारा च श्रीपरमेश्वर प्रीत्यर्थं अन्नप्राशन कर्मणा संस्करिष्ये ‖ तदङ्गं गणपतिपूजनं पुण्याहवाचनं नान्दीश्राद्धं च करिष्ये ‖ इति सङ्कल्प्य कुर्यात् ‖

औपासनाग्निं पित्रतिरिक्ते कर्तरि लौकिकं वा प्रतिष्ठाप्य व्याहृति पर्यन्तं कृत्वा जुहोति | नात्र प्रधान होमः -- इमं मे वरुण तत्वायामि त्वन्नो अग्ने सत्वन्नो अग्ने त्वमग्ने अयासि प्रजापतेति हुत्वा | जयादि प्रभृति ब्रह्मोत्वासन पर्यन्तं कृत्वा | अन्नप्राशन कर्माङ्गं अन्नहोमं करिष्ये इति सङ्कल्प्य कुर्यात् | अन्नहोम कर्माङ्गं स्वस्ति पुण्याहवाचनं च कुर्यात् | ततः अग्निरुपस्थानम् ‖ ततः स्वदक्षिणे मातुरुत्सङ्गस्थं प्राङ्मुखंशिशुं दधिमधुघृतमिति त्रिवृन्मिश्रं कृत्वा प्रतिमन्त्रं प्राशयति | भूस्त्वयि दधामि | भुवस्त्वयिदधामि | सुवस्त्वयिदधामि | ततोन्न मेकवारं प्राशयति ---- अपांत्वौषधीनाँरसं प्राशयामि | शिवास्ताआप ओषधयः संत्वनमीवास्त आपओषधयो भवन्त्विति |

ततोमुखं प्रक्षाल्य बालकं भूमावुपवेश्यतदग्रे पुस्तक वस्त्र शस्त्रादिशिल्पानि विन्यस्य स्वेच्छया शिशुर्यत्स्पृशेत् सास्यजीविकेति परीक्षां कुर्यात् ॥

**॥ आयुर्वर्धापन विधिः ॥**

बालकस्य अब्दपूर्ति जन्मनक्षत्रे कर्ता कृतमांगलिकः प्राङ्मुख उपविश्य स्वदक्षिणतः संस्कार्यसहितां भार्यांचोपवेश्य देशकालौ सङ्कीर्त्य मम अस्य बालकस्य आयुरभिवृद्धिद्वारा श्रीपरमेश्वर प्रीत्यर्थं आयुर्वर्धापनाख्यं कर्म करिष्ये इति सङ्कल्प्य । तदङ्गं गणपतिं संपूज्य पूण्याहं वाचयित्वा ॥ ततः औपासनमग्निं लौकिक मग्निं वा प्रतिष्ठाप्य व्याहृति पर्यन्तं हुत्वा अग्नेरुत्तरतः उदकुम्बं विधाय वरुणं आयुर्देवताञ्च आवाह्य – वैशेषिक प्रधानहोमे यो ब्रह्मा ब्रह्मण उज्जहार इत्यादि (आयुष्य सूक्तेन) तथा अमुक जन्मनक्षत्रं द्देवताञ्च सङ्कल्पित संख्यया आज्येन जुहूति । अङ्गहोमे वरुणं द्विरित्यादि व्याहृत्यन्तं हुत्वा जन्म नक्षत्रं तद्देवतां वा तन्नाममन्त्रेण हुत्वा होमशेषं समापयति । ततः कुम्भ जलेन बालकस्य अभिषेकं प्रोक्षणं वा कुर्यात् । यथाशक्ति स्वजन बन्धु सुहृत्पूजां च कृत्वा ब्राह्मणान् भोजयेत् ॥

**॥ चूडाकरणम् ॥**

जन्मतो तृतीये वर्षे उदगयने शुक्लपक्षे ज्योतिर्विदुक्ते काले चूडाकर्म कार्यम् । यजमानः कृतमाङ्गलिकः प्राङ्मुख उपविश्य दक्षिणतः कुमार सहितां भार्यां च उपवेश्य देश कालौ सङ्कीर्त्य अस्य कुमारस्य बीजकर्म समुद्भवैनो निबर्हणद्वाराऽऽपुर्वर्च्चोभिवृद्धिद्वारा च श्रीपरमेश्वर प्रीत्यर्थं चूडाकरणाख्यं कर्म करिष्ये । तदङ्गं गणपतिपूजनं पुण्याहवाचनं नान्दी श्राद्धं अङ्कुरारोपणं च करिष्ये इति सङ्कल्प्य कुर्यात ॥

औपासनाग्नि प्रतिष्ठाप्य व्याहृति पर्यन्तं कृत्वा नात्र प्रधान होमः -- इमं मे वरुण तत्वायामि त्वन्नोअग्ने सत्वन्नो अग्ने त्वमग्ने अयासि प्रजापतेति हुत्वा जयादि प्रभृति ब्रह्मोत्वासन पर्यन्तं कृत्वा यथा पुरस्तात त्रिवृदन्न होमं पुण्याहवाचनान्तं कृत्वा ॥

अग्नेः पश्चाद्दक्षिणतः कुमारः मध्ये आचार्यः उत्तरतो माता ब्रह्मचारी वा कश्चित्केश संयमनार्थं आनडुहं गोमयं धारयन्नुपविशति ॥ बहिस्तप्ता अपः शीतासुसंसृज्यता आदाय – दक्षिनं गोदानमुनत्ति – आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे । तस्मिन् गोदाने ऊर्ध्वाग्रान्कुशान्निदधाति – ओषधे त्रायस्वैनम् इति । तेषुक्षुरं निदधाति – स्वधितेमैनँहिँसीरिति । ततः प्रवपति --- देवश्रूरेतानि प्रवपे इति । एवमवशिष्ट गोदानत्रयेपि उन्दनादि वपनान्तं समानं कर्म । वपने पृथक् मन्त्राः । प्रदक्षिणं वपनं कार्यम् । ततः पश्चाद्वपति --- येवावपत्सविताक्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्मणो वपतेदमस्योर्जेमँरय्या वर्चसा सँसृजाथेति ॥ तत उत्तरतो वपति – येन पूषा

बृहस्पतेरग्नेरिन्द्रस्य चायुषेवपत् । तेनतेहं वपाम्यमुकशर्मन्निति संबुद्ध्यन्तं संस्कार्य नाम गृह्णाति । ततः पुरस्तात् वपति – यथाज्योक्सुमना असत् । ज्योकूचसूर्यं द्दशे – इति । समग्र वपनम् । वपनानन्तरं नापितेन चूडाश्च कारयेयुः ॥ यथोचितं चूडाः कारयति अथऋषिर्वा ॥ कुमारस्यावश्यकः कश्चित्तान् गोमयाच्छादि तान्केशानादाय गोष्ठ उदुंबरे दर्भस्तंबे वा अवटं कृत्वा निदधाति योस्य रातिर्भवति ॥ यत्र पूषा बृहस्पतिः सविता सोमो अग्निः । तेभ्यो निधानं बहुधाव्यैच्छन्नन्तराद्यावा पृथिवी अपः सुवरिति ॥ ततः कृत शुद्धस्नानः कुमारः आचार्यादीन्प्रणमेत् । सर्पिष्मन्तमोदनं नापिदाय दच्वा यथा श्रद्धं ब्राह्मणाय ददाति ॥

॥ एवं विहितं षोढशे वर्षे गोदान कर्म ॥

॥ **उपनयनप्रयोगः** ॥

"उपनयनं व्याख्यास्यामः । सप्त वर्षं ब्राह्मणमुपनयीत । एकादश वर्षं राजन्यं द्वादश वर्षं वैश्यम् । वसन्ते ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यम् । आपूर्यमाण पक्षे पुण्ये नक्षत्रे विशेषेण पुन्नामधेये ॥"

आचार्यः पत्न्या कुमारेण च सह यथाचारं स्नानं यथाशक्ति अलंकरणं अहत वस्त्र परिधानं च कृत्वा । प्राङ्मुख उपविश्य स्वदक्षिणतः कुमारं पत्नीं च उपवेश्य देश कालौ सङ्कीर्त्य उपनयन कर्माङ्गं गणपतिपूजनं नान्दी श्राद्धं पुण्याहवाचनं उदकशान्तिं अङ्कुरं प्रतिसरं कुमारभोजनं च करिष्ये इति सङ्कल्प्य कुर्यात् ॥

लौकिकाग्निं प्रतिष्ठाप्य (व्याहृत्यन्तमुक्त्वा) (मुखान्तं कृत्वा) प्राकृतानि वैकृतानि च पात्राणि आसादयति । दर्वीं आज्यस्थालीं प्रणीतापात्रं प्रोक्षणी पात्रं इध्मं बर्हिः दर्भान् उपवेषं कटिसूत्रं कच्छं यज्ञोपवीतं मेखलां अश्मानं कूर्चं दंडं अजिनं भिक्षा पात्रं सप्तपलाशसमिधश्च वाससी गां आज्यं च आसाद्य परिधि परिधानां तमाचार्यः समापयेत् । अथ भुक्तं कृतवपनं स्नानं अलंकृतं कृताहतवस्त्र परिधानं वटुं अग्नेरुत्तरतः समानीय प्राङ्मुखं कृत्वा कटिसूत्रं कच्छं च तृष्णीं दत्वा आचमनं कारयेत् । ततः देशकालौ सङ्कीर्त्य अमुकनक्षत्रे राशौ जातस्य अमुक शर्मणः अस्य मम कुमारस्य श्रौतस्मार्त कर्मानुष्ठान योग्यतासिद्ध्यर्थं यज्ञोपवीत धारणं करिष्ये इति सङ्कल्प्य मन्त्रं पठन्यज्ञोपवीतं धारयति । ओम् यज्ञस्य उपवीतेन उपव्ययामि । दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय यशसे ब्रह्मणे ब्रह्मवर्चसाय सर्वेषां वेदानामाधिपत्याय । यज्ञोपवीतं परमं पवित्रं प्रजा पतेर्यत्सहजं पुरस्तात् ।आयुष्यमग्रयं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ इत्याचार्यदत्तोपवीतेन कुमारो यज्ञोपवीती भूत्वा आचम्य पूर्वेणाचार्यमपरेणाग्निं गत्वाचार्याद्दक्षिणतः प्राङ्मुख उपविश्यान्वारभते । तत आचार्यः परिषेचनादि सामान्य प्रधानान्तं हुत्वा व्याहृतीभिश्च हुत्वा प्रतान होमं

करोति --- आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीकोघृतयो निरेधि | घृदं पीत्वा मधुचारुगव्यं पितेवपुत्रमभिरक्षतादिमँ स्वाहा | आयुर्देग्नय इदं न मम ॥ आयुर्दा देव जरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने | घृतं पिवन्नमृतं चारुगव्यं पितेव पुत्रं जरसेनयेमँ स्वाहा | आयुर्दे देवायाग्नय इदं न मम ॥ इति प्रदानाहुति द्वयं हुत्वा ॥

ततः इमं मे वरुणेत्यादिस्विष्टकृदन्तं हुत्वा | उत्तर परिधि सन्धेरुत्तरतोश्मानं निधाय | कुमारमात्माग्नयोरन्तरानीत्वा दक्षिणेन पादे नोपक्रम्य प्राङ्मुखं पद्म्यामवस्थापयति – आतिष्ठेममश्मानमश्मेव त्वँस्थिरो भव | प्रमृणीहिदुरस्यून्त्सहस्बपृतनायत इति | ततः परि धापितंवासः प्रज्ञातं निधाय ततोऽहतं वासः प्राङ्मुखस्य परिधापयति – या अकृन्तन्नवयन्या अतन्वतयाश्च देवीरन्तान-भितोददन्त | तास्त्वादेवीर्जरसा संव्यन्त्वा युष्मानिदं परिधत्स्व वासः | परिधत्त धत्त वाससैनँशतायुषं कृणुत दीर्घमायुः ॥ बृहस्पतिः प्रायच्छद्वासएतत्सो मायराज्ञे परिदातवाऊ | जरांगच्छासिपरिधत्स्ववासो भवाकृष्टीनाम भिशस्ति पावा | शतञ्च जीव शरदः सुवर्चारायञ्च पोषमुपसंव्ययस्व – इति | ततोद्विराचान्तमभिमन्त्रयते | परीदं वासोधिधास्वस्तये भूरापीणामभिशस्ति पावा | शतञ्च जीवशरदः पुरूजीर्वसूनिचाय्यो विभजासजीवन् – इति | ततः त्रिगुणयामेखलया प्रदक्षिणं त्रिः परिव्ययति | या दुरितापरिबाधमाना शर्मवरूथे पुनतीन आगात् | प्राणापानाभ्यां बलमावहन्तीस्वसा देवानाँसुभगा मेखलेयम् - इति ॥ उत्तरतो नाभेस्त्रिवृतं ग्रन्थिं कृत्वा दक्षिणतो नाभेः परिकर्षति | ततो जिनमुत्तरीयं करोति | मित्रस्यचक्षुर्धरुणं धरीयस्ते जोयशस्विस्थविरँ समिद्धम् | अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं धत्स्व --- अमुकशर्मन् अदितिस्ते कक्षां बध्नातु | बेदस्यानुवक्तवैमे धायैश्रद्धाया अनुक्तस्यानिराकरणायब्रह्मणे ब्रह्मवर्चसे – अमुक शर्मन् – इति | ततः इन्द्रायत्वां परिददे इति वदेत् | परिदेहीतिमाणवकः | परीममिन्द्र ब्रह्मणे महे श्रोत्रायध्वस्यथैनं जरिमाणयेज्योक्श्रोत्रेधिजागरत् – इति | ततोमाणवकमपरे-णाग्निमुदङ्मुखमुपवेश्यहुतशेषमाज्यं मन्त्रत्रयेण एकवारं प्राशयति – त्वयिमेधां त्वयिप्रजां त्वय्यग्निस्तेजोदधातु | त्वयिमेधां त्वयिप्रजां त्वयीन्द्रइन्द्रियं दधातु | त्वयिमेधां त्वयिप्रजां त्वयिसूर्योभ्राजोदधतु ततः आचार्यः माणवकः प्राश्नन्तं समीक्षते – योगेयोगेतवस्तरं वाजे वाजे हवामहे | सखाय इन्द्रमूतये | इममग्न आयुषे वर्चसे कृधि प्रियँरेतो वरुण सोम राजन् | मातेवास्मा अदितेशर्म यच्छविश्वेदेवा जरदष्टिर्यथासत् इति |

ततः कृतशुद्धाचमनः कुमारं आचार्यं तूष्णीं स्पृशति | आचार्य श्चैनमभिमन्त्रयते – शतमिन्नुशरदो अन्ति देवायत्रानश्चत्का जरसं तनूनाम् | पुत्रासोयत्रपितराभवन्ति मानोमध्यारीरिषतायुर्गन्तोः इति |

ततः प्रदाक्षिणमग्निं चरन्तं वटुमभिमन्त्रयते – आगन्तासम गन्महिप्रसमृत्युंयुयोतन | अरिष्टाः सञ्चरेमहिस्वस्ति चरतादिहस्वस्त्या गृहेभ्यः इति |

ततो वटुं उपनयनार्थं वाचयति - ब्रह्मचर्यमागामुपमानयस्व ब्रह्मचारी भवानिदेवेनसवित्राप्रसूत - इति ||

तता आचार्यः पृच्छति – कोनामासि |

ततो माणवकः व्यावहारिकं नाम नक्षत्रंनाम च वदति ||

(गिरिधरशर्मास्मि रौहिण शर्मास्मीत्येवं प्रकारेण)

तताअचार्यः स्वस्तिदेवसवितरहमनेन (गिरिधरशर्मणा रौहिण शर्मणा) उद्दचमशीय – इति नामनीगृह्णाति |

ततकुशैरुभावात्मानं मार्जयतः शन्नोदेवीरभिष्टय आपोभवन्तु पीतये | शंयोरभिस्रवन्तु नः - इति |

अथ प्रधानोपनयनम् | प्राङ्मुख आचार्यः उदङ्मुखस्य कुमारस्य दक्षिणमंसं स्वदक्षिणेन हस्तेन सव्यं सव्येन तृष्णीं अन्वारभ्य आत्मनोदक्षिणेन हस्तेनब्रह्मचार्यभिमुखेन तस्यहृदयं स्पृष्ट्वा समीपमुपनयति भूर्भुवसुवस्तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि | धियो योनः प्रचोदयात् | देवस्यत्वासवितुः प्रसवेश्विनोर्वाहुभ्यामुपनये – अमुकः शर्मन् इति ||

तता अचार्यः स्वदक्षिणहस्तेन वटोर्दक्षिणं हस्तं साङ्गुष्ठमुत्तानं गृह्णाति अग्निष्टे हस्तमग्रभीत् | सोमस्ते हस्तमग्रभीत् | सविता ते हस्तमग्रभीत् | सरस्वतीते हस्तमग्रभीत् | पूषाते हस्तमग्रभीत् | बृहस्पतिस्ते हस्तमग्रभीत् | मित्रस्ते हस्तमग्रभीत् | वरुणस्ते हस्तमग्रभीत् | त्वष्टाते हस्तमग्रभीत् | धाताते हस्तमग्रभीत् | विष्णुस्ते हस्तमग्रभीत् | प्रजापतिस्ते हस्तमग्रभीत् | - इति

ततो वटुं संशास्ति – सवितात्वाभिरक्षतु मित्रस्त्वमसि धर्मणा ग्निराचार्यस्तवदेवेन सवित्रा प्रसूतो बृहस्पतेर्ब्रह्मचारी भव – अमुक शर्मन् ||

| | | | |
|---|---|---|---|
| आचार्यः - | अपोशानः | | माणवकः -- | बाढम् |
| “ | समिध आधेहि| | “ ---- | बाढम्| |
| “ | कर्म कुरु| | “ ---- | बाढम्| |
| “ | मा दिवास्वाप्सीः | “ ---- | बाढम्| |

ततः स्वहस्तेन ब्रह्मचारिणो दक्षिणमंसं उपर्युपरि तृष्णीमन्व वमृश्य हृदयदेशमभिमृशति | मम हृदये हृदयन्ते अस्तु | मम चित्तं चित्तेनान्वेहि | मम वाचमेकमनाजुषस्व बृहस्पतिस्त्वानियुनक्तुमह्यम् | मामेवानुसँ-रभस्वमयिचित्तानिसन्तु तेमयिसामीच्यमस्तु तेमह्यं वाचं नियच्छतात् - इति |

ततो नाभि देशमभिमृशति – प्राणानां ग्रन्थिरसि समाविस्रसः - इति ॥

ततः कुमारमभिमन्त्रयते – भूर्भुवः सुवः सुप्रजा प्रजया भूयासँ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः षोषैः सुमेधामेधयाः । सुब्रह्मा ब्रह्मचारिभिः - इति ।

ततः पुनः कुमारमभिमन्त्रयते – भूऋर्क्षुत्वाग्नौपृथिव्यांवाचि ब्रह्मणिददे – अमुकशर्मन् । भुवोयजुः षुत्वा वायावन्तरिक्षेप्राणे ब्रह्मणि ददे – अमुकशर्मन् । सुवः सामसुत्वा सूर्येदिवि चक्षुषि ब्रह्मणि ददे – अमुकशर्मन् । विष्णुस्ते प्रियोसानि अमुकशर्मन् । इष्टतस्ते प्रियोसानि अमुकशर्मन् । अनलस्यते प्रियोसानि अमुकशर्मन् । इदं वत्स्यावः अमुकशर्मन् । प्राण आयुषि वत्स्यावः अमुकशर्मन् । प्राण आयुषिवसाम् अमुकशर्मन् ॥

ततो ब्रह्मचारिणो दक्षिणं हस्तमुत्तानं साङ्गुष्टं गृह्णाति । अग्नि रायुष्मान्स वनस्पतिभिरायुष्मान्ते नत्वायुषायुष्मन्तं करोमि । सोम आयुष्मान्स ओषधीभिरायुष्मान्ते नत्वायुष्मन्तं करोमि । यज्ञ आयुष्मान्स दक्षिणाभिरायुश्मान्तेन त्वायुषायुष्मन्तं करोमि । ब्रह्मायुष्मत्तद्ब्राह्मणै रायुष्मत्तेनत्वायुषायुष्मन्तं करोमि । देवा आयुष्मन्तस्तेमृतेनायुष्मन्त स्तेनत्वायुषायुष्मन्तं करोमि । इति ॥

ततो मन्त्रद्वयं वटोर्दर्क्षिणे कर्णे जपति । आयुष्टे विश्वतोदधदयमग्निर्वरेण्यः । पृनस्ते प्राण आयति परा यक्ष्मँसुवामिते। अग्नौ पृथिव्यां प्रतितिष्ठवायावन्तरिक्षे सूर्येदिवियाँस्वस्तिमग्निर्वायुरा दित्यश्चन्द्रमा आपोनुसञ्चरन्ति ताँस्वस्तिमनुसञ्चर – अमुक शर्मन् । प्राणस्य ब्रह्मचार्यभूः अमुक शर्मन् – इति।

ततो मन्त्रद्वयं उत्तरे कर्णे जपति । आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीकोघृतयोनिरेधि । घृतं पीत्वामधुचारुगव्यंपितेव पुत्रमभिरक्षतादिमम् । अग्नौ पृथिव्यां प्रतितिष्ठवायावन्तरिक्षे सूर्येदिवियाँस्वस्ति मग्निर्वायुरा दित्यश्चन्द्रमा आपोनुसञ्चरन्ति ताँस्वस्तिमनुसञ्चर – अमुक शर्मन् । प्राणस्य ब्रह्मचार्यभूः अमुक शर्मन् – इति।

ततो ब्रह्मचारिणो मुखेन मुखँसन्निधाय जपति – मेधांतइन्द्रो ददातुमेधां देवी सरस्वती । मेधांते अश्विनावुभावाधत्तां पुष्करस्रजौ – इति

ततो वटुमुत्थाप्य कषकादि देवेभ्यस्त्वां परिददे । परिदेहीति वटूक्तौ ॥

| | | |
|---|---|---|
| आचार्यः कषकायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः अन्तकायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः अघोरायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः गदायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः यमायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः मखायत्वा परिददामि | वटुः | परिदेहि |

| | | |
|---|---|---|
| आचार्यः वशिन्यैत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः पृथिव्यैत्वासवैश्वानरायै परिददामि | वटुः | परिदेहि |
| आचार्यः अभ्द्यस्त्वा परिददामि | वटुः | परिदेहि |
| आचार्यः ओषधीभ्यस्त्वा परिददामि | वटुः | परिदेहि |
| आचार्यः वनस्पतिभ्यस्त्वा परिददामि | वटुः | परिदेहि |
| आचार्यः ध्यावापृथिवीभ्यांत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः सुभूतायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः ब्रह्मवर्चसायत्वा परिददामि | वटुः | परिदेहि |
| आचार्यः विश्वेभ्यस्त्वा देवेभ्यः परिददामि | वटुः | परिदेहि |
| आचार्यः सर्वेभ्यस्त्वा भूतेभ्यः परिददामि | वटुः | परिदेहि |
| आचार्यः सर्वेभ्यस्त्वादेवताभ्यः परिददामि | वटुः | परिदेहि |

इति परिदानम् ।

**अथ सावित्री ग्रहणम् ॥**

तत आचार्यो गायत्र्युपदेशार्थमुदगग्रेकूर्चे प्राङ्मुख उपविशति । राष्ट्रभृद-स्थाचार्यासन्दीमात्वद्योषम् – इति ।

ततो ब्रह्मचारी आदित्यायाज्जलिना नमस्कारं विधाय आचार्यस्य दक्षिणं पादं सकुक्षिकं सव्यान्वारब्धेन दक्षिणेन हस्तेनावमृशति – इति । उपसंग्रहणं कार्यम् ॥

अथाभिवादनम् । दक्षिणं बाहुं सव्यान्वारब्धं श्रोत्रसमं प्रसार्य – अमुक प्रवरान्वितामुकगोत्रोमुक सूत्रोमुकशाखाध्याय्योमुक शर्माहंभो – अभिवादये इत्युच्चारयन् शिरोवनति पूर्वकमाचार्यस्य नमस्कारकरण मभिवादनं व्यावहारिकेण नाम्ना कार्यम् ॥

तत आचार्येणायुष्मान्भवामुकशर्मन् । इतिप्लुतान्त्यस्वरोच्चारणेन प्रयुत्का-शीर्वादोविनतोभूत्वा । सर्ववेदारंभार्थत्वेन सावित्र्युपदेशं वाञ्छन्नध्येष्यमाणा वचनद्वयात्मकेनमन्त्रेणैक श्रुत्याह । अधीहि भोः सावित्रींभो अनुब्रू हिति ।

तत आचार्यः स्वदक्षिणतः वटुमुपवेश्य अभिमन्त्रयति । ओम् गणानांत्वा गणपतिँहवामहे कविंकवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः श्रृण्वन्नूतिभिः सीदसादनम् ॥ ओम् भूस्तत्सवितुर्वरेण्यम् । भुवो भर्गोदेवस्य धीमहि । सुवर्धियोयोनः प्रचोदयात् । ओम् भूर्भुवस्तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। सुवर्धियोयोनः प्रचोदयात् । ओम् भूर्भुवः सुवस्तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात् – इति ।

तैत्तिरीयकाणांगायत्र्यारंभेणैव सर्ववेदारंभो भवति ॥

ततः कुमारः देशकालौ सङ्कीर्त्य मम मेधाद्यभिवृद्धिद्वारा ब्रह्मचर्य व्रत ग्रहणाङ्गं सप्तपलाशसमिद्धोमं करिष्ये इति सङ्कल्प्य आचार्यः कारयति। घृतान्वक्तं साग्रंपलाशसमित्सप्तकमादाय । अग्नये समिधमाहार्षं बृहते जातवेदसे । यथात्वमग्नेसमिधासमिध्यस एवं मां मेधया प्रज्ञया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधयस्वाहा। इति एकां समिधं जुहोति। अग्नय इदं न मम ॥ अग्नये समिधौ आहार्षं बृहते जातवेदसे। यथात्वमग्ने समिधा समिध्यस एवं मां मेधया प्रज्ञया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा। इति द्वे जुहोति। अग्नय इदं न मम ॥ अग्नये समिधः आहार्षं बृहते जातवेदसे । यथात्वमग्ने समिधा समिध्यस एवं मां मेधया प्रज्ञया प्रजया पशुभिर्ब्रह्मवर्चसेन्नाद्येन समेधयस्वाहा। इति चतस्रोजुहोति। अग्नय इदं न मम ॥ आचार्यः परिषिञ्चति यथा पुरस्तात्।

अथ ब्रह्मचर्याश्रम व्रतग्रहणं कुर्यात् । आचार्यः ब्रह्मचारिणा कर्तव्यानि व्रतान्युपदिशति ॥ ब्रह्मचारीनगायेन्नरोदेन्ननृत्य दर्शीस्यादित्यादि । कुमारः देशकालौ सङ्कीर्त्य – मम ब्रह्मचर्याश्रम विहित सकल व्रतानांग्रहणं यावत्समावर्त्तनं यथाशक्ति करिष्ये । इति सङ्कल्प्य उपस्थेयदेवता अभि सन्धायोपतिष्ठते । -- अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम् । वायोव्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम् । आदित्य व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम्। व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम्॥ - इति

तत आचार्योमाणवकमुत्थापयति। -- उदायुषास्वायुषो दोषधीनाँ रसेनोत्पर्जन्य स्यशुष्मेणो दस्थाममृताँअनु॥ इति

आचार्यः सूर्यैषते पुत्रस्तं ते परिददामि माणवकः परिदेहि

ततः ब्रह्मचारी आदित्यमुपतिष्ठते । -- तच्चक्षुर्देवहितं पुरस्ताच्छुक्र मुच्चरत् । पश्येमशरदः शतं जीवेमशरदः शतं नन्दामशरदः शतं मोदाम शरदः शतं भवाम शरदः शतं शृणवामशरदः शतं प्रब्रवाम शरदः शतमजीतास्याम शरदः शतंज्योक्चसूर्यं दृशे॥

ततोदंडं प्रयच्छति । आचार्यः अग्निष्टाप्युः प्रतरां कृणोत्वग्निष्टे पुष्टिं प्रतरांदधात्विन्द्रो मरुद्भिरिहते दधात्वादित्यस्ते वसुभिरादधा ज्विति॥

ततः तूष्णीं भिक्षापात्रमरिक्तं प्रदायाह भिक्षाचर्यं चरेति ॥ ततो ब्रह्मचारी ओमित्याज्ञामादाय प्रथमं मातरं प्रत्याख्यायिनीं भिक्षेत – भवतीभिक्षांदेहि ॥ प्रथमं भिक्षितमादायऽऽचार्यायनिवेदयति । सुभैक्ष्यं भो इति आचार्यः तत्प्रतिगृह्णाति । ततो रातिकुलेषु भिक्षेत् ॥ तत आचार्यः वटोः पूर्वं प्रज्ञातंनिहितंवासः प्रतिगृह्णाति। -- यस्यते प्रथमवास्यँहरामस्तंत्वाविश्वे अवन्तु देवाः। तंत्वा भ्रातरः सुहृदो वर्धमान मनुजायतां बहवः सुजातम्॥

ततः त्रिवृदन्नहोमं पुण्याहवाचनंच कुर्यात् ॥ {पृ. द्द द्रष्टव्यः }

अथ त्रयहव्रतं चरति ॥

त्रयहव्रतम् ॥

ब्रह्मचारी त्र्यह व्रतग्रहणं करिष्ये इति अग्न्यादि सन्निधौ सङ्कल्प्य उपस्तेयदेवता अभिसन्धायोपतिष्ठते । {पृ. २२ द्रष्टव्यः} – अग्ने व्रतपते ++ चरिष्यामि । इक्षु विकारलवण माषमुद्गादि धान्य मधु मांसानि न भोक्तव्यानि । उपरिशयनं मृत्मयेन जलपानं शूद्राय स्वोच्छिष्टदानं दिवास्वापादि वर्जनीयानि । उभौकालौ भिक्षाचर्यम् । सायमुपक्रम्य उभौकालौ सायं सायं वा अग्निकार्यं (समिधादानम्) कार्यं । इत्यादि स्वीकृत्य चतुर्थ दिवसे विसर्गः कार्यः ॥

चतुर्थ दिवस कृत्यम् ॥

चतिर्थ दिवसे प्रातराचार्यः कृतनित्य क्रियः ब्रह्मचारि सहितः प्राङ्मुख उपविश्य देशकालौ सङ्कीर्त्य त्रिवृदन्नहोमं पुण्याहवाचनं करिष्ये इति शङ्कल्प्याचार्य एव कुर्यात् ॥ ततः ब्रह्मचारी देशकालौ सङ्कीर्त्य स्वीकृतस्य त्र्यहव्रतस्य विसर्गं करिष्ये इति उपस्थेय देवता अभिसन्धायो पतिष्ठते ॥ अग्नेव्रतपते त्र्यहव्रतमचारिषं तदशकं तन्मेराधि । वायोव्रतपते त्र्यहव्रतमचारिषं तदशकं तन्मेराधि । आदित्य व्रतपते त्र्यहव्रतमचारिषं तदशकं तन्मेराधि । व्रतानं व्रतपते त्र्यहव्रतमचारिषं तदशकं तन्मेराधि ॥ इति व्रत विसर्गः ॥

॥ इति सत्याषाढकृत उपनयन प्रयोगः ॥

**॥ वेदव्रतोपाकरण प्रयोगः ॥**

समावर्तन प्राक्कनान्याचार्य कर्तृकाणि कर्मणि । यावदुक्तमेव ब्रह्मचारी करोति ॥

आचार्यः ब्रह्मचारी सहितोनद्यादौ स्नात्वा कृत नित्य क्रियः प्राङ्मुख उपविश्य दक्षिणतो ब्रह्मचारिण मुपवेश्य देशकालौ सङ्कीर्त्यस्या मुकशर्मणो ब्रह्मचारिणो वेदाध्ययनाधिकार सिद्धिद्वारा श्रीपरमेश्वर प्रीत्यर्थं प्रजापत्य सौम्याग्नेय-वैश्वदेवाख्य चतुर्णांकाण्ड व्रतानामुपाकरणाणि तन्त्रेण करिष्ये । तदङ्गं गणपति पूजनं पुण्याहवाचनं नान्दीश्रद्धं च करिष्ये इति सङ्कल्प्य कृत्वा । लौकिकमग्निं प्रतिष्ठाप्य सामान्यप्रधानान्तं हुत्वा । वेशेषिक होमे । सदसस्पतिमद्भूतं प्रियमिन्द्रस्यकाम्यम् । सर्निमेधामयासिषँस्वाहा । सदसस्पतय इदं न मम ॥ प्रजापतये काण्डर्षयेस्वाहा । प्रजापतये काण्डर्षय इदं न मम ॥ सोमाय काण्डर्षयेस्वाहा । सोमाय काण्डर्षय इदं न मम ॥ अग्नये काण्डर्षयेस्वाहा । अग्नये काण्डर्षिय इदं न मम ॥ विश्वेभ्यो देवेभ्यः काण्डर्षिभ्यः स्वाहा । विश्वेभ्यो देवेभ्यः काण्डर्षिभ्य इदं न मम ॥ तत इमंमे वरुणेत्यादि देवसवितः प्रासावीरिति परिषेक विसर्गान्तं आचार्यः समापयेत् ।

ततो ब्रह्मचारी उपस्थेय देवता अभिसन्धायोपतिष्ठते ॥ ---- अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम् । वायो व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम् । आदित्य व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम् । व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मेराध्यताम् ।तत आचार्यः यथेतं प्रणीताः पर्याहृत्य संस्था जपान्तं कर्म समापयेत् ॥ नात्रत्रिवृदन्न होमः ॥ गुरवे वरं दद्यात् ॥

ब्रह्मचारी स्वविहितानिव्रतान्याचरन्नध्ययनं कुर्यात् ॥

**॥ वेद व्रतोत्सर्जनम् ॥**

आचार्यः ब्रह्मचारी सहितो नद्यादौ स्नात्वा कृत नित्यक्रिया प्राङ्मुख उपविश्य दक्षिणतो ब्रह्मचारीं उपविश्य देशकालौ सङ्कीर्त्य अस्य ------- शर्मणो ब्रह्मचारिणो वेदाध्ययनाङ्गत्वेन स्वीकृतानां प्राजापत्यादि चतुर्णां काण्डाख्य व्रतानामुत्सर्जनं तन्त्रेण करिष्ये । तदङ्गं गणपति पूजनं पुण्याहवाचनं नान्दीश्रद्धं च करिष्ये इति सङ्कल्प्य युक्तरीत्या कुर्यात् ॥

लौकिकमग्निं प्रतिष्टाष्य्य मयिगृह्णामि इत्यादि व्याह्यत्यन्तं हुत्वा वैशेषिक होमे सदसस्पतिं इत्यादि विश्वान्देवान्काण्डर्षीं इत्यन्तं हुत्वा । (पृ २२ द्रष्टव्यः) ततः इमंमे वरुण इत्यादि परिषेक विसर्गान्तं आचार्यः समापयेत् ॥

ततो ब्रह्मचारी उपस्थेय देवता अभिसन्धायोपतिष्टते ॥ अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेराधि । वायो व्रतपते व्रतमचारिषं तदशकं तन्मेराधि । आदित्य व्रतपते व्रतमचारिषं तदशकं तन्मेराधि । व्रतानां व्रतपते व्रतमचारिषं तदशकं तन्मेराधि । इति व्रत विसर्गं कुर्यात् ॥ आचार्यः प्रणीताः पर्याह्यत्य संस्था जपान्तं समापयेत् ॥ नात्र त्रिवृदन्न होमः ॥ इति वेद व्रतोत्सर्गः ॥

**॥ शुक्रिय व्रतोपाकरणम् ॥**

आचार्यः चन्द्रानुकूल्येसतिशुभदिने प्राङ्मुखमुपविश्य स्वदक्षिणतः प्रह्मचारिणमुपवेश्य देशकालौ सङ्कीर्त्य अस्य ब्रह्मचारिणो वेदाध्ययनाधिकार सिद्धिद्वारा श्रीपरमेश्वर प्रीत्यर्थं सौम्य व्रतान्तर्गत शुक्रिय व्रतोपाकरणं करिष्ये तदङ्गं गणपति पूजनं पुण्याहवाचनं नान्दीश्रद्धं च करिष्ये इति सङ्कल्प्य कृत्वा सायंहोमानन्तरमस्तमिते आदित्ये ग्रामात्प्रागुदग्वा जलसमीपेगत्वा प्राङ्मुखो ब्रह्मचारि सहित उपविश्य देशकालौ सङ्कीर्त्य शुक्रिय व्रताङ्गं लौकिकमग्निं प्रतिष्ठाप्य प्राणायामान्तं कृत्वा अग्नेरुत्तरतः उतकुम्भं निधाय मदन्तिदेवतां वरुणंच आवाह्य ----- नमोवाचे ++ पितरोनुमतन्तु इति जपं कुर्यात् ॥ ततः व्याहृति देवताश्चाज्येन यक्ष्ये इत्युक्तवा समिधोग्नावाधाय प्रोक्षणीं दर्वीं आज्य स्थालीं औदुंबरीश्वतस्रः समिधः वासः कुशाद्यासद्य प्रोक्षणी संस्कारादि परिषेकान्तं कृत्वा ॥ समिद्धः --- ओम् पृथिवी समित् । तामग्निः समिंधे । साग्निँसमिंधे । तामहँसमिंधे । सामा समिद्धा । आयुषा तेजसा । वर्चसाश्रिया ।

यशसा ब्रह्मवर्चसेन अन्नाद्येन समिंताँस्वाहा | अग्नय इदं न मम || अन्तरिक्षँसमित् | सावायुँसमिंधे | तामहँसमिंधे | सामा समिद्धा | आयुषा तेजसा | वर्चसा श्रिया | यशसा ब्रह्मवर्चसेन | अन्नाद्येन समिंताँस्वाहा | वायव इदं न मम || द्यौः समित् | तामादित्यः समिंधे | सादित्यँसमिंधे | तामहँसमिंधे | सामा समिद्धा | आयुषातेजसा | वर्चसाश्रिया | यशसा ब्रह्मवर्चसेन | अन्नाद्येन समिंताँस्वाहा | आदित्यायेदं न मम | प्राजापत्यामेसमिदसि सपत्नक्षयणी | भ्रातृव्यहामे सिस्वाहा | प्रजापतय इदं न मम || प्रायश्चित्तार्थं व्याहृति होमं कृत्वापरिषिच्य | मदन्ति जपं --- शन्नो वातः पवतां ++ तन्नोमाहासीत् ++ इति || ततो ब्रह्मचारी अग्नयादिसन्निधौ शुक्रिय व्रतग्रहणं करिष्ये इति सङ्कल्प्य उपतिष्ठते | अग्ने व्रतपतेव्रतं चरिष्यामि ---- इत्यादिना व्रतं स्वीकृत्य वाससाशिरः समुखं वेष्टयित्वा ग्रामं प्रविश्य तां रात्रिंवाग्यतस्तिष्ठेत् | उदित आदित्ये शिरोमुख वेष्टने विमुच्य कृतनित्यक्रियोग्निकार्यं कृत्वा आदित्य मुपतिष्ठते | ---- वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयोनाधमानाः | अपध्वान्तमूर्णुहिपूर्द्धि चक्षुर्मुमुग्ध्य स्मान्निधयेव बद्धान् | तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् | पश्येमशरदः शतं ++ सूर्यंद्दशे – इति || ततः आदित्यमग्निमश्मानं कुभंवत्सं हिरण्यंच द्दष्ट्वा आचार्याय दक्षिणां दद्यात् ||

|| **शुक्रिय व्रतोत्सर्जनम्** ||

आचार्यो ब्रह्मचारि सहितः कृतनित्यक्रियः प्राङ्मुख उपविश्य देशकालौ सङ्कीर्त्य अस्य ब्रह्मचारिणो स्वीकृतस्य शुक्रिय व्रतस्योत्सर्जनं करिष्ये इति सङ्कल्प्य गणेशपूजनादि कृत्वा अग्निं प्रतिष्टाप्य परिषेकान्तं पूर्ववत् कृत्वा समिद्धोमे विशेषः --- द्यौः समिदिति विलोम पाठेन औदुंबरीश्चतस्रः समिधो हुत्वा कुंभं निधाय मदन्ति जपं कृत्वा तत जलेन माणवकं प्रोक्ष्य आदित्य व्रतपते व्रतमचारिषमित्यादि व्युत्क्रम पाठेनोपस्थानादि कुर्यात् |

पृथक्काण्ड व्रतोपाकरण पक्षे सौम्योपकरणानन्तरं शुक्रिय व्रतोपाकरणोत्सर्जने कृवा सौम्योर्त्जनं कुर्यात् ||

|| **समावर्तनम्** ||

पूर्वोक्त व्रताचरणपूर्वकं यथाशक्ति वेदमधीत्य उदगयने सिते पक्षे रोहिणी मृगतिष्योत्तरा फल्गुनी ह्स्त चित्रा विशाखाद्यन्यतमे नक्षत्रे चंद्रानुकूल्ये शुभेदिने उपनयनोक्तेकाले समावर्तनं कार्यं || समावर्तन प्राक्तनान्याचार्यकर्तृकाणि कर्माणि यावदुक्तं ब्रह्मचारी करोति | सामावर्तनंतु ब्रह्मचारी कर्तृकमेव ||

ब्रह्मचारी कृत नित्यक्रियः प्रातरग्निकार्यानंतरं आचार्य सहित अपां समीपे शुचौ देशे गत्वाथवा गोष्टं सूर्यरश्मि दर्शन रहितं सम्य गाच्छाद्य रात्रावेव ब्रह्मचारी तत्र गत्वा प्रातरग्नि कार्यानन्तरं प्राङ्मुख उपविश्य देशकालौ संकीर्त्य मम

गृहस्थादि आश्रम सिद्दिद्वार श्री परमेश्वर प्रीत्यर्थं समावर्तनाख्यं कर्म करिष्ये | तदंगं गणेशपूजनं पुण्याहवाचनं नान्दी श्राद्धं च करिष्ये इति संकल्प्य कृत्वा || तत्र पावक नामानं लौकिकमग्निं प्रतिष्ठाप्य व्याह्यति पर्यन्तं कृवा | { प्रधान होमे जातवेदसमग्निं पलाश समिधा यक्षये | व्याह्यतीनां अग्निं घायुं सूर्यं प्रजापतिं अग्निं च आज्येन | अंगहोमे वरुणं द्विरित्यादि पात्रा सादनात्प्राकू कृत्वा} प्राकृतानि दर्व्यादीनि आसाद्य पालाशीं समिधं दन्तधावनमौदुंबरं काष्टमाद्रं उष्णशीता अपः क्षुरं आनडुहं गोमयं सौरभयुक्तं चंदनं वाससी कुंडले मणिं आदर्शं छत्रं दंडं उपानहौ स्रजं आंजनं चेति वैकृतानि आसाद्य सामान्य प्रधान होमान्तं कृत्वा | प्रधान होमः | ओं इमँस्तोममर्हते जातवेदसे रथमिव संमहे मामनीषया | भद्राहिनः प्रमतिरस्य सँ सद्यग्ने सख्येमारिषा मावयन्तवस्वाहा || इति पालाशिं समिधं जुहोति | जातवेदसे अग्नय इदं न मम || ततो व्यस्त समस्त क्रमेण व्याह्यतीराज्येन हूत्वा | त्र्यायुषं जमदग्नेः कश्यपम्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अम्तु त्र्यायुषँस्वाहा | अग्नय इदं न मम || इति षद्प्रधानाहुतीर्हुत्व | तत इमंमे वरुण इत्यदि त्रिवृदन्न होमं पुण्याहवाचनान्तं कृत्वा | तत उपनयने स्वीकृतानां सकल ब्रह्मचारि व्रतानां विसर्गं करिष्ये इति संकल्प्य अग्निपुरोगात् चतस्रो देवत अभिसंधाय उपतिष्ठते | अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेराधि | एवं वायोव्र ++ आदित्यव्र व्रतानांव्र ++ इत्यायुक्तरित्या व्रत विसर्गं कृत्वा || तत उदुत्यं चित्रमिति द्वाभ्यां आदित्यं ऊपस्थाय ||

उत्तरीयमचिनरूपंवासो निदधाति | उदुत्तमं वरुणपाशमस्मच्छ्रथायेति || ततः अन्तरीयं कच्छोपरि कटिप्रदेशे वेष्ठितं वासो निदधाति | अवाधमं वरुण पाशमस्मच्छ्रथायेति || अन्यद्वासः परिधाय द्विराचम्य | ततो मेखलं निदधाति | विमध्यमं वरुण पाशमस्मच्छ्रथायेति || ततोदंडं निदधाति | अथावयमादित्यव्रतेतवानागसो अदितयेस्यामेति || ततोऽजिनं वासो मेखलां दंडं चाप्सु तूष्णीं प्रक्षिप्य अपरेणाग्निं प्राङ्मुख उपविश्य क्षुरँसंमृशति | क्षुरोनामासि स्वातिधिस्तेपिता नमस्ते अस्तु मामाहिँसीरिति || ततः तृष्णीं वप्त्रे प्रदाय शीतास्वप्सु उष्णा आनीयाभिमृशति | शिवानो भवथ सँस्पृशे इति | ततोः दक्षिणं गोदानमुन्दति | आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इति | गोदान ऊर्ध्वाग्रान् कुशान्निदधाति ओषधे त्रायस्वैनमिति | कुशोपरिं क्षुरं निदधाति | स्वधिते मैनँहिँसीरिति | ततो गोदान स्थान्तसकेशान्कुशान्वपति | देवश्रूरे तानि प्रवपे इति | उदंनादिवपनांतं वप्तुः कर्मवचनसामर्थ्यादाचार्यस्यवा | ततो वप्तारं समीक्षते |यत्क्षुरेण मर्चयथा सुपेशसावप्तर्वपसि केशश्मश्रुवर्चया मुखं मानअयुः प्रमोषीरिति || ततः श्मश्रूपयक्ष क्रमेण मुखस्य सर्वश्मश्रूणां वपनं शिखां विहाय शिरः स्थसर्वकेशानां बाहुमूलमारम्य सर्व लोम्नां नखानांच वपनं कारयेत् | स्नातकस्य बन्धु जनः कश्चिदानडुहे गोमये श्मश्रु लोम नखान्यंतर्धाय गोष्ठ उदुंबरे दर्भस्तंबे वा अवटं कृत्वा तत्र निदधाति | इदमहममुष्यामुष्यायणस्यपाप्पानमवगूहामि इति | अत्र इदमहं गिरिधरशर्मणो नैतुंदनस्य पाप्पानमवगूहामि इत्येवं प्रकारेण मन्त्रं पठित्वा

श्मश्रू अद्य अवटे निदाय अवटं मृत्तिकया अपिधाय करजकल्काद्द्युद्वर्तनेन शरीरमलमुत्साद्य औदुंबर काष्टेनार्द्रेण दन्तान प्रक्षलयति | अन्नाद्याय व्यूहध्वं दीर्घायुत्वाय व्यूहध्वं ब्रह्मवर्चसाय व्यूहध्वं दीर्घायुरहमन्नादो ब्रह्मवर्चसी भूयासमिति ॥ अथ प्रधानस्नानम् ॥ शीत मिश्राभिरुष्णाभिरद्भिः सर्वमन्त्रान्ते एक वारं स्नाति ॥ आपोहिष्ठेति तिसृभिः हिरण्यवर्णा इति चतसृभिः पवमानस्सुवर्चन इत्यनुवाकेनचेति ॥ स्नानं कृत्वा द्विराचम्य शुक्ले वाससी परिधाय द्विराचम्य बन्धुजनैरानीतं सर्वसुगन्धयुतं द्रव्यं चन्दनपिष्टं वा तज्जलेन अभ्युक्ष्य तेन पाणी प्रलिप्य देवेभ्यः प्राचीनं नमस्कारं अंजलिंकरोति ॥ ओं नमोग्रहायचाभिग्रहाय च ओं नमः शाकजंजभाभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्रहिणीरिति ॥ ततस्तेनैवांजलिना मुखमारभ्य अनुलोममात्मानं अनुलिंपति ॥ अप्सरासुच यो गंधो गन्धर्वेषुच यद्यशः | दैव्यो यो मानुषो गन्धः समामाविशतादिह | इति ॥ तत अहते वाससी तृष्णीं जलेन अभ्युक्ष्य | अन्तरीयवासः अधो नाभि उपरि जानु परिदधाति ॥ सोमस्य तनूरसि तनुवंमे पाहि स्वामातन् राविश शिवामातनूरावि शेति | ततो द्विराचम्य मन्त्रावृत्या अत्क्रीयं वासश्च परिधाय द्विराचम्य | कटिसूत्रं कच्छंच परित्यज्य | इतः परं कटि सूत्रं कच्छधारणंच प्रतिषिध्यते |

ततोपरेणाग्निं प्राङ्मुख उपविश्य सुवर्णाच्छादितं चन्दन काष्ठ कृतं बादरंवा मणिं कुण्डलेच सूत्रप्रोते दर्भेण प्रबघ्याग्नावुपरि धारयन् तत्र दर्व्या जुहोति पंचभिः मन्त्रैः ॥ आयुष्यं वर्चस्यँरायस्पोष मौद्भिदं | इदँहिरण्यामायुषे वर्चसे जैत्रायाविशतां माँ स्वाहा ॥ हिरण्याय इदं न मम ॥ उच्चैर्वाजि पृतनासाहँसभासाहं धनंजयं | सर्वाः समग्राऋद्धयो हिरण्येस्मिन्त्समाभृताः स्वाहा ॥ हिरण्यायेदं न मम ॥ शुनमहँ हिरण्यस्य पितुरिव नामाग्रभीषं तं मा हिरण्य वर्चसं करोतु पुरुषु प्रियं ब्रह्मवर्चसिनं मा करोतु स्वाहा ॥ हिरण्यायेदं न मम ॥ प्रियं मा कुरु देवेषु प्रियं मा ब्रह्मणि कुरु | प्रियं विश्वेषु शूद्रेषु प्रियं मा कुरु राजसु स्वाहा ॥ हिरण्यायेदं न मम ॥ इयं ओषधे त्रयमाणा सहमाना सहस्वती | सामा हिरण्य वर्चसं करोतु पुरुषु प्रियं ब्रह्मवर्चसिनं मा करोतु स्वाहा ॥ हिरण्यायेदं न मम ॥ इति पंचाहुतीर्हुत्वा ॥

ततः स्वाहाकार वर्जितैः एतैरेव पञ्चभिर्मन्त्रैः मणिं कुण्डले च उदषात्रे त्रिः प्रदक्षिण मावर्त्य सम्यक्प्रक्षाल्य | ततो दक्षिणे कर्णे कुण्डलं निदधाति | विराजं च स्वराजंचाभिष्टिः याचनो गृहे | लक्ष्मीराष्ट्रस्य या मुखे तया मासँसृजामसि – इति ॥ मन्त्रावृत्या सब्ये निदधाति ॥ ततो दक्षिण कर्णस्थं कुण्डलं यथा न पतति तथापिदधाति | ऋतुभिष्ट्वार्तवैरायुषे वर्चसे संवत्सरस्य धायसा तेन पन्ननुगृह्णासीति | पुनः मन्त्रं षठित्वा सव्यकर्णस्थं अपिदधाति | ततोग्रीवायां मणिं बध्नाति | इयमोषधे त्रायमाणा सहमाना सहस्वती | सामा हिरण्य वर्चसं करोतु पुरुषु प्रियं ब्रह्मवर्चसिनं माकरोत्वपाशोसि इति ॥ ततो द्वाभ्यां स्रजं धारयति | शुभिके शोभमारोह शोभयन्ती मुखं मम ॥ सुखं च मम शोभय

भयाँसंच भगं कुरु ॥ यामाहरज्जमदग्निः श्रद्धायै कामायास्यै । इमां तां प्रितिमुञ्चेहं मगेन सह वर्चसा ॥ इति ॥

ततस्त्रैककुदेनां जनेनान्येन कज्जलादिनावा मकृदुल्केन मन्त्रेण हस्ताभ्यां बहुकृत्वोयुगपदनक्ति । थदाञ्चनं त्रैककृदं जातँहिपवत उपरि । तेनवामांजेहंभगेन सह वर्चसा मयि पर्वतपूरुषमिति । युगपदशक्तौ सव्यमङ्त्वा दक्षिणमनक्ति ॥ तदा द्विवचनान्तेपिमंत्रे चक्षुः संस्कार त्वान्मन्त्रावृत्तिः ॥

तत आत्मानमादर्शेऽवेक्षते । यन्मे मनः परमागतं यद्वामे अषरागतं । राज्ञासोमेन तद्वयमस्मासु धारयामसि ॥ इति ॥

ततो वैणवं दण्डं प्रतिगृह्य देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णामि – इति ॥ ततो दण्डं सकृन्मन्त्रं उक्त्वा त्रिरुन्मार्ष्टि । इन्द्रस्य वज्रोस्यश्विनौ मापातम् – इति ॥ ततः सकृदुल्केन मन्त्रेण दण्डं त्रिः प्रदक्षिणमुपरिशिरो भ्रामयति । वेगवेजयास्मत् द्विषतस्तस्कारा-न्त्सरीसृषान्द्वावापदान् रक्षाँसिपिशाचान्पौरुषेयाद्भयान्नो दण्डरक्षविश्वस्मा द्भयाद्रक्ष सर्वतो जहि तस्करानननः सर्व वृक्षेषु जायसेत्वँसपत्नहा ॥ जहि शत्रुगणान्त्स र्वान्त्समंतंमधवानिब इति । यदि प्रमादाद्धस्ताद्दण्डः पतति तं पुनः आदत्ते । योमे दण्डः परापतद्विहायसोधि भृम्यां ॥ इमं तं पुनराददे यमायुषेच बलाय च – इति । इदं च दण्डधारणं यावज्जीवं मधुपर्कान्तकर्मसमाध्यंतं वा आवश्यकम् ॥

ततः सकृन्मन्त्रेण पादयोः उपानहौ अवबध्य युगपदवरोहति । युगपदशक्तौ मन्त्रावृत्तिः । प्रतिष्ठेस्थो देवते मामा सन्ताप्तम् इति ॥ ततः छत्रं प्रति गृह्णाति । प्रजापतेः शरणमसि ब्रह्मणश्छदिः -- इति । ततश्छत्रधारणानंतरं ग्रामप्रवेशार्थं रथाति यानमारुह्य तत्गृहं मधुपर्क पूजार्थं स्नातको गच्छेत् ॥

॥ **मधुपर्कः** ॥

समावर्तन दिने स्नातकः पूजकस्य गृहं आगच्छति । तत्र पूजकः स्नातकं मधुपर्केण पूजयति ॥

पूजकः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य उपस्थितं स्नातकं मधुपर्केण पूजयिष्ये इति सङ्कल्प्य मधुपर्कपात्राणि सहैवासा दयति । कांस्ये दधि मधुघृतमिति त्रिवृद्दधिमधुघृतमापः सक्तैति पाङ्क्तं – यथा शक्ति गां वस्त्र यज्ञोपवीताभरणानि च आसाद्य ।

पूजकः अर्घ इति त्रिः प्राह । पूज्यः कुरुतेति प्रत्याह । पूजकः कूर्च इति त्रिः प्राह । पूज्यः सुकूर्च इत्युक्त्वा हस्ताभ्याँ प्रतिगृह्य दूभ्यामाक्रम्योदगग्रे कूर्चे प्राङ्मुख उपविशति । राष्ट्रभृदस्या चार्यासन्दीमाव्वद्योषम् – इति ॥ पूजकः प्राद्यमिति त्रिः प्राह । पूज्यः सुपाद्यमिति प्रत्याह । पूजकः पूज्यस्य पादौ प्रक्षाळयति – ततः

पूज्यः पूजकस्य हस्तौ अभिमृशति | विराजो दोहोसिमयि दोहः | पाद्यायै विराजो इति | ततः आत्मानमभिमृशति || मयि तेज इन्द्रियं वीर्यमायुः कीर्तिर्वर्चोयशोबलम् – इति | ततः पूजकः वस्त्रालङ्कारादिसहितमर्ध्यमिति त्रिः प्राह | पूज्य स्वर्ध्यमिति सर्वं प्रतिगृह्णाति | आमागन्यशसासँसृज तेजसा वर्चसापयसा च | तंमाकुरुप्रियं प्रजानामधिपतिं पशूनाम् – इति | अर्घ्यं जलं पूजकेन दीयमानं किञ्चित्तूष्णींप्रतिगृह्यावशिष्टं प्रदात्रे प्रदाय तेन भूमौनिनीयमानमनुमन्त्रयते | समुद्रंवः प्रहिणोम्यक्षिताः स्वांयोनि मपिजच्छत | अच्छिद्रः प्रजयाभूयासं मापरासेचिमत्पयः - इति | ततः प्रतिगृहीतेन वस्त्रालङ्कारादिनात्मानमलङ्करोति | द्विराचम्य || पूजकः आचमनीयमिति त्रिः प्राह | पूज्यः स्वाचमनीयमिति | पूजकः अमृतोपस्तरणमसि इति | अपः आचामति | ततः पूजको मधुपर्कमादाय मधुपर्क इति त्रिः प्राह | पूज्यः - सुमधुपर्कह्त्युत्क्वा सावित्रेणोभाभ्यां हस्ताभ्यां प्रतिगृह्णाति || ततः तं पृथिव्यां प्रतिष्ठापयति | पृथिव्यास्त्वानाभौ सादयामीडायाः पदे – इति | ततः दक्षिणाकरस्यांगुष्ठेनोपमध्यमयाच सकृदुत्केन मन्त्रेण त्रिः प्रदक्षिणमालोड्यति – यन्मधुनो मधव्यंपरममन्नद्यँरूपं | तेनाहं मधुनोमधव्येन परमेण रूपेण परमो मध्व्योन्नादोभूयासम् – इति | ततोमन्त्रावृत्या अङ्गुष्ठोपमध्यमाभ्यामेव त्रिः प्राश्नाति – तेजसेत्वाश्रियैयशसेबलाया न्नाद्याय प्राश्नामि – इति | योस्य रातिर्भवति तस्मादुच्छिष्टं प्रयच्छति | अभावे सर्वं प्राशयति | ततः अमृतापिधानमसि – इति अपः आचामति | ततः पूजको गौरिति त्रिः प्राह | पूज्यः सुगौरित्युत्क्वा गामुत्सृजति || गौर्येनुर्भव्या माता रुद्राणां दुहिता वसूनाँस्वसादित्यानाममृतस्य नाभिः | प्रणुवोचंचिकितुषेजनाय-मागामनागामदितिंवधिष्ट | पिबतू दकंतृणान्यत्तु | ओमुत्सृजत – इति | ततः पूजक सिद्धेनन्नेन भूत मिति त्रिः प्राह | पूज्यः तत्सुभूतं विराडन्नं तन्माक्षायि तन्मेशीय तन्म ऊर्जंधास्तत्सुभूतमिति प्रत्याह | ब्राह्मणान्भोजयत इति | ततः पूजकः ब्राह्मण भुत्क शेषमन्नं पूज्याय ददाति | पूज्यः तत्प्रतिगृह्णाति – द्यौस्तेददातु पृथिवी प्रतिगृह्णातुपृथिवीते ददातु प्राणः प्रतिगृह्णातु प्राणस्त्वाश्नातु प्राणः पिबतु – इति ततो यावत्कामं प्राश्नाति योस्य रातिर्भवति तस्मादुच्छिष्टं प्रयच्छति | इन्द्राग्नीमेवर्चः कृणुतांबर्चः सोमो बृहस्पतिः | वर्चोमेविश्वेदेवा वर्चोमेधत्त मश्विना इति |

विवाहेपि वरस्य मधुपर्क पूजा कार्याः ||

**|| कन्यावरणम् वाग्दानम् च ||**

ज्योतिर्विदादिष्टे विवाहनक्षत्रयुते शुभे काले द्वौचत्वारोष्टादयोवा ब्राह्मणाः प्रशस्तवेषाः वरेण तत्पित्रादिना वा प्रेषिताः ||

अनृक्षराऋजवः सन्तु पन्थायेभिः सखायोयन्तिनोवरेयम् | समर्यमासं भगोनोनिनीयात्संजास्पत्यं सुयममस्तुदेवाः - इति मन्त्रपाठ पुरः सरं माङ्गल्यद्रव्य गंध तांबूल वस्त्राभरणायुत प्रशस्त वेषाभिः पुरंध्रीभिः सह

गीतावाद्यातिधोषेण कन्यागृहमेत्य शुभेवस्त्राच्छादितेपीठे प्रङ्मुखीं सालंकारां सुवेषां कन्यामुपवेश्य गन्ध ताम्बूलादितद्धस्ते वरपित्रादिर्दत्त्वातत्पित्रादयः गणपतिपूजन पूर्वकं प्राङ्मुखासीनाः। कन्यादातारं प्रति ब्राह्मणान् पृच्छसि – अमुकप्रवरान्विता मुकगोत्रो त्पान्नयामुकप्र पौत्रायामुकपौत्रायामुक पुत्रायामुक शर्मणे वराय । अमुकप्रवरोपेता मुकगोत्रो त्पन्नामुक प्रपौत्रीममुकपौत्रीममुकपुत्रीममुक नाम्नीं कन्यां भार्यात्वाय धर्मप्रजात्वाय वृणीमहे – इति। अथ कन्यादाता भार्याज्ञातिबन्ध्वनुमतिं कृत्वा – वृणीध्वम् इति वदेत्।

कन्यादाता देश कालौ सङ्कीर्त्य करिष्यमाण विवाहाङ्गभूतं वाग्दानमहं करिष्ये इति। ततङ्गम् गणपति पूजनं कृत्वा स्वस्थाते कन्या पूजयितारं उपवेश्यस्वयं तत् प्राच्यां प्रत्यङ्मुख उपविश्य गन्ध तांबूलादिना पूजयेद् । ततोदाता अमुकप्रवरान्वितामुकगोत्रोत्पन्नयाममुक प्रपौत्रायामुकपौत्रायामुक पुत्रायामुक शर्मणे वराय । अमुकप्रवरान्विता मुकगोत्रो त्पन्नाममुकप्रपौत्रीममुक पौत्रीममुकपुत्रीममुक नाम्नीं कन्यां ज्योतिर्विदाष्टेमुहूर्ते दास्ये – इति वाचा संप्रददे इति चोक्त्वा ॥ इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ । वाचादत्तामया कन्या पुत्रार्थं – स्वीकृतात्वया। कन्यावलोकनविधौ निश्चितस्त्वं सुखी भव। इति वर पितरं प्रति पठेत्। स च। वाचादत्तात्वया कन्या पुत्रार्थं स्वीकृता मया। वराबलोकनविधौ निश्चितस्त्वं सुखीभव ॥ इति कन्यापितरं प्रति पठेत् ॥ ततो ब्राह्मणाः - शिवा आपः सन्तु। सौमनस्यमस्तु। अक्षतंचारिष्टं चास्तु । दीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिश्चास्तु ॥ एतद्वः सत्यमस्तु ॥ इति उक्त्वा – समानीव आकूतिः समानाहृदयानिवः । समानमस्तुवोमनो यथावः सुसहासति ॥ ततो गन्धताम्भूलादिभि र्ब्राह्मणान् संपूजयेत् ॥

**॥ वरस्य वधूगृहगमनम् ॥**

वरः कृत नित्यक्रियः स्वलंकृतः इष्टदेवता गुर्वादींश्च नमस्कृत्य तैरनुज्ञातो यथा विभववमश्वादि यानं तृष्णीमारुह्यधृतसितच्छत्रः स्वचितैः ज्ञाति बान्धवैः कनिक्रदत् ------ इयमेवसाया ----- इत्यादिमङ्गलसूक्त पठनपरैः ब्राह्मणैः पुरन्ध्रीभिः पूर्णकलश दर्षणकन्या पुष्पाक्षत दीपमाला ध्वज लाजैर्मङ्गलतृर्यघोषैश्च सह वधूगृहमेत्य तद्वारदेशे प्राङ्मुखस्थितो नीराजन पूर्णकुंभयुतैः पुरन्ध्री जनैः प्रत्युद्या तोनीराजितोंतर्गृहं प्रवेश्यमण्डपान्तः सम्यगास्तृतेपीठे प्राङ्मुख उपविशेत् ॥

**॥ मधुपर्केण वरस्य पूजा ॥**

कन्यादाता उदङ्मुख उपविश्य स्व दक्षिणतः पत्नीमुपवेश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य विवाहार्थमुपस्थितं वरं मधुपर्केण पूजयिष्ये इति सङ्कल्प्य कूर्चादि सकलमधुपर्कपूजा सामग्रीमासाद्य पूज्यशाखया समावर्तनोक्तरीत्या मधुपर्कपूजां कुर्यात्। 31 पृष्टं द्रष्टव्यम्

|| **कन्यादानम्** ||

ततः कन्यादाता वर दत्त वस्त्राभरणादि रहितां स्वदेयाभरणाद्य लंकृतामहत वस्त्रपरिधानां कन्यां वराय दद्यात् ॥ दाता वधूवर दक्षिणतः उदङ्मुख उपविश्य स्वदक्षिणतः पत्नीमुपवेश्याचम्यप्राणानाम्य देशकालौ सङ्कीर्त्य मम समस्तपितृणां निरतिशयसानन्द ब्रह्म लोकावाप्त्यादि कन्याप्रतिपादन कल्पोक्त फ़लावाप्तये अनेन वरेणास्यांकन्याया मुत्पादयिष्यमाण सन्तत्याद्वादशा वरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायण प्रीतये ब्राह्मविवाहविधिना कन्याप्रतिपादनमहं करिष्ये इति सङ्कल्प्य ॥ वरं महाविष्णु स्वरूपमितिध्यात्वास्य पादपूजां कृत्वा ॥ दाता ----- अमुकप्रवरान्वितामुक गोत्रोत्पन्नायामुक प्रपौत्रायामुक पौत्रायामुक पुत्रायामुक शर्मणे कन्यार्थिने श्रीधर रूपिणे वराय | अमुकप्रवरोपेतामुक गोत्रोत्पन्नामुक प्रपौत्रीममुक पौत्रीममुक पुत्रीममुक नाम्नीं वरार्थिनीं श्रीरूपिणीं मदीयांकन्याम् | एवं त्रिः ततो दाता सपत्नीक उत्थायो उदङ्मुख एव प्रत्यङ्मुख्याः कन्यायादक्षिणमंसं प्रगृह्य ---- कन्यां कनकसंपन्नां कनकाभरणैयुतां | दास्यामि विष्णवे तुभ्यं ब्रह्मलोक जिगीषया | विश्वंभराः सर्वभृताः साक्षिण्यः सर्वदेवताः | इमां कन्यां प्रदास्यामि पितृणां तारणाय च | इति मन्त्रौ पठित्वा - काम्स्यपात्रे कन्याञ्जल्युपरिस्थ वराञ्जलि दक्षिण हस्ते स्वदक्षिणेन हस्तेन मङ्गलद्रव्यादि दक्षिणा सहितं भार्यादत्त संतत जलधारोदकं क्षिपन्वदेत् | इमां कन्यां प्रजापति दैवत्यां प्रजा सहत्व कर्मभ्यस्तुभ्यमहं प्रतिपादये इत्युकत्वा दद्यात् | ततो वरः | ओं तथेति प्रतिगृह्णाति | ततोदाता ---- गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् | ---- गोत्राय ----- शर्मणेतुभ्यं दत्तां विप्र समाश्रय ॥ कन्ये ममाग्रतोभूयाः कन्येमेदेविपार्श्वयोः | कन्येमेपृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् | मम वशं कुले जाता पालितावत्सराष्ट्रकम् | तुभ्यंविप्र मया दत्ताबुत्र पौत्रप्रवर्धिनी ॥ धर्मेचार्थचकामेच नातिचरितव्यात्वयेयम् | नाति चरामीति वरः | ततो वरः ---- देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णामि राजात्वा वरुणो नयतुदेवि दक्षिणेग्नये हिरण्यं तेनामृतत्वमश्यां वयोदात्रेमयोमह्यमस्तु प्रतिग्रहीत्रे कैदं कस्माअदात्कामः कामाय कामोदाता काम प्रतिग्रहीताकामँ समुद्रमाविश कामेनत्वा प्रतिगृह्णामिकामै तत्तेषातेकामदक्षिणो त्तानस्त्वांगीरसः प्रतिगृह्णात्विति पठित्वा --- ओं स्वस्ति – इति प्रतिगृह्णाति ॥

ततो दाता जलपात्र भोजनपात्र गोमहिष्यश्वगजदासदासीभृवाह नालङ्कारादि यथा विभवं सङ्कल्पपूर्वकं वराय दद्यात् ॥

|| **माङ्गल्य धारणम्** ||

ताम्भूल दक्षिणा सहितं माङ्गल्यं वस्त्रे निधाय | ब्राह्मणान् बन्धुजनान् सुवासिनीञ्च अनुज्ञाप्य | कन्यकायाः वस्त्रं ददाति | ----- सुमङ्लीरियं |

वस्त्र धारणं कृत्वा | अग्निं प्रतिष्ठाप्य | नान्दीश्राद्धं पुण्याहवाचनं च कृत्वा || पुण्याह जलेन दम्पत्योः प्रोक्ष्य | वरः माङ्गल्यसूत्रं इष्टदेवता स्मरण पूर्वकं वधूकण्ठे बध्नाति || ---- माङ्गल्यंतन्तुनानेन भर्तृजीवनहेतुना | कण्ठे बध्नामि सुभगेसाजीव शरदांशतम् --- इति ||

|| **विवाह व्रतं** ||

ततः दंपती देश कालौ संकीर्त्य चतुर्थ दिन पर्यन्तं अक्षारादिकं विवाह व्रतं चरिष्यावहे इति संकल्प्येक्षुविकारादि सामुद्रादि लवणवर्जमशनं कुर्वाणौ वस्त्राभरणादिना अलंकुर्वाणौ मैथुनवर्जं सह वसतः ||

|| **विवाहहोमः** ||

प्राङ्मुखो वर आचम्य प्राणानायम्य देशकालौ स्ङ्कीर्त्य परिगृहीतायां वध्वां भार्यात्वसिद्धिद्वाराग्नबौपासनत्वसिद्धि द्वारा च श्री परमेश्वर प्रीत्यर्थं विवाहहोमं करिष्ये इति सङ्कल्प्य |अग्निं प्रतिष्ठाप्य प्राणायामान्तं कृत्वा व्याहृत्यन्तमुक्त्वा अश्मानं लाजान्व्रीह्यादि बीजान्यभिषेकार्थं कलशं चासाद्य परिधि परिधानान्तं कृत्वा |

ततो वधूमीशान देशतो बान्धवैः समानीयमानां वरः समीक्षते | --- सुमङ्गलीरियं वधूरिमाँसमेतपश्यत | सौभाग्यमस्यैदत्वायाथा स्तंविपरेतन – इति || ततो वधूरुत्तरेण पात्राणि अग्निस्वामिनोरन्त रागत्वादक्षिणतः पतिमुपविश्याचम्यान्वारभते || ततो वरः परिषेकादि सामान्यप्रधानान्तं हुत्वा प्रधान होमं करोति || अग्निरैतुप्रथमो देवतानाँसोस्यै प्रजां मुञ्चतुमृत्युपाशात् | तदयँराजावरुणोनुमन्यतां यथेयँस्त्रीपौत्रमघं नरोदास्वाहा | अग्नी वरुणाभ्यां इदं न मम || १ || इमामग्निस्त्रायतांगार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः | अशून्योपस्थाजीवतामस्तुमातापौत्रमानन्दमभिप्रवुध्यतामियँ स्वाहा || अग्नये-गार्हपत्यायेदं न मम || २ || मातेगृहेनिशिघोष उत्थादन्यत्र त्वदुदत्यः संविशन्तु | मात्वंविकेश्युरआवाधिष्ठाजीवपत्नी पति लोके विराजप्रजांपश्यन्ती-सुमनस्यमानाँस्वाहा | अग्नये गृहपतय इदं न मम ||३ || द्यौस्तेपृष्ठँरक्षतु वायुरूरू अश्विनौ च स्तनन्धयतस्तेपुत्रान्त्स वितािभरक्षतु | आवाससः परिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षंतु पश्चात्स्वाहा || दिवेवायवेअश्विभ्यां सवित्रेबृहस्पतये विश्वेभ्योदेवेभ्य इदं न मम || ४ || अप्रजस्तां-पौत्रमृत्युंपाप्मानमुतवाघं शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पापँस्वाहा | अग्नये पाप्मन इदं न मम || ५ || देवकृतं ब्राह्मणं कल्पमानं तेन हन्मियोनिषदः पिशाचान् | क्रव्यादोगृत्यूनघरान्पादयामि दीर्घमायुः तव जीवन्तु पुत्राः स्वाहा | अग्नये देवेभ्य इदं न मम || ६ || ततः इमं मे वरुण इत्यादि षडाहुतीर्हुत्वा || उत्तरेणोत्तरंपरिधि सन्धिमश्मानं निधाय तत्र दक्षिण पादोपक्रमेण पद्भ्यां वधूं प्राङ्मुखीमवस्थापयति ----- आतिष्ठेममश्मानमश्मेवत्वँस्थिरा भव || प्रमृणीहिदुरस्यू न्त्सहस्वपृतनायत – इति ||

|| **पाणिग्रहणम्** ||

पाणिग्रहणाद्धिसहत्वमिति धर्मेस्मराणात् विवाहे पाणिग्रहणं प्रधानम् || तद्यथा सुमुहूर्ते भवति तथा कर्तव्यम् |

अपरेणाग्निं द्वयान्दर्भान्पूर्वापरानुदगग्रान्निधाय | तत्र पूर्वेदर्भेषु स्वयं प्रत्यङ्मुखस्तिष्ठन् अपरदर्भेषुतिष्ठन्त्याः प्राङ्मुख्यास्तस्याः साङ्गुष्ठं सलोममुत्तानं हस्तं गृह्णीयात् | [यदिकामयेतपुंसो जनयेयमित्यङ्गुष्ठं गृह्णीयात् | यदिकामयेतस्त्रीरित्यङ्गुलीः | यदिकामयेतोभयं जनयेयमीत्यभीव लोमान्यङ्गुष्ठं सहाङ्गुलिभिर्गृह्णीयात् |] ------- सरस्वतिप्रोदमिव सुभगे वाजिनीवति | तांत्वाविश्वस्यभूतस्यप्रजा यामस्यग्रतः | गृह्णामिते सुप्रजास्त्वाय हस्तं मयापंत्या जरदष्टिर्य थासत् | भगो अर्यमा सविता पुरन्धिर्मह्यंत्वा दुर्गार्हपत्यायदेवा --- इति || ततस्तामग्रेणदक्षिणमंसंप्रदक्षिणमावृत्य स्वदक्षिणतः प्रत्यङ्मुखीं कृत्वाभिमन्त्रयते | ------ अघोरचक्षुरपतिघ्नि येधिशिवा पशुभ्यः सुमनाः सुवर्चाः | जीवसूर्वीरसूः स्योनाशंन एधिद्विपदे शं चतुष्पदे | तां नः पृषंच्छिवतमामेरयस्वयस्यां बीजं मनुष्या वपन्ति | यानऊरूउशती विस्रयातैयस्यामुशन्तः प्रहरेमशेपम् | सोमः प्रथमोविविदेगन्धर्वो विविद उत्तरः | तृतीयो अग्निष्टेपतिस्तुरीयोहं मनुष्यजाः | सोमोददद्गन्धर्वाय गन्धर्वोग्नयेददात् | पशूँश्चमह्यं पुत्राँश्चाग्निर्ददात्यथोत्वाम् | अमुहमस्मिसात्वं द्यौरहंपृथिवीत्वँसामाह मृक्त्वंतावेहिसंभवावसहरेतो दधावहैपुँसे पुत्राय वेत्तवैरायस्पोषाय सुप्रजास्त्वाय सुवीर्याय | इमांत्वमिन्द्रमीढ्वः सुपुत्राँसुभगां कुरु | दशास्यां पुत्रानाधेहिपतिमेकादशंकुरु – इति || ततस्तांयथायतनं दक्षिणतउपवेश्य स्वयंचोपविश्यतदञ्ज लावाज्येन तृष्णीमुपस्तीर्यतत्र मन्त्रावृत्या अस्याभ्रात्रादिर्वरोवा यथाचारं लाजान्द्विरावपति {त्रिःपञ्चावत्तिनः ] इमांल्लाजानावपामिसमृद्धिकरणान्ममतुभ्यंच संवननं तदग्निरनुमन्य तामयम् | तूष्णीमभिघार्य | दर्वीस्थानीयं तदञ्जलिमादाय वरो जुहोति | ---- इयं नार्युपब्रूतेग्नौलाजानावपन्ति दीर्घायुरस्तुमेपति रेधंतांज्ञातयोमम स्वाहा | अग्नय इदं न मम | ततोवधूमुत्थापयति ---- उदायुषास्वायुषोदोषधीनाँरसेनोत्पर्जन्य स्यशुष्मेणोदस्थाममृताँअनु --- इति | ततस्या सह प्रदक्षिणमग्निमनुपरिक्रामति --- विश्वाउतत्वयावयंधाराउदन्या इव | जतिगाहे महिद्विष – इति | पुनस्तथैव तामुपवेश्यतदञ्जला वुपस्तीर्यद्विर्लाजानोप्याभिघार्य तथैव हुत्वोत्थाप्य प्रदक्षिणमग्निं परिक्रम्य तथैव लाजानां तृतीयाहुतिं हुत्वा तृतीयं परिक्रम्य आज्येनैव सौविष्टकृतं हुत्वा पश्चात् जयादिहोमः कार्यः || तत इध्मसन्नहनप्रहरणा दिसंस्था जपान्तं कर्म समापयेत् | नात्रत्रिवृदन्न होमः |

ततः तामपरेणाग्निं प्राजीमुदीचीं वा दक्षिणेन पादेन प्रक्रम्य वक्ष्यमाण मन्त्रैः प्रति सन्त्रं सप्त विष्णुक्रमान् क्रामयति || एकमिषेविष्णुस्त्वान्वेतु | द्वेऊर्जे विष्णुस्त्वान्वेतु | त्रीणि व्रताय विष्णुस्त्वान्वेतु चत्वारिमायोभवाय विष्णुस्त्वान्वेतु

। पञ्चपशुभ्यो विष्णुस्त्वान्वेतु । षड्रायस्पोषाय विष्णुस्त्वान्वेतु । सप्तसप्तभ्योहोत्राभ्यो विष्णुस्त्वान्वेतु । सप्तमेस्थिते पादमवस्थाप्य वरो जपति । ------ सखायौसप्तपदावभूध सख्यं ते गमेयँसख्यात्तेमायोषँसख्यान्मे मायोष्ठाः --- इति । ततोस्या दक्षिणंपादं स्वदक्षिणेन पादेना क्रम्यदक्षिणेन हस्तेनास्या दक्षिणमंसमुपर्युपर्यन्ववमृश्य ह्यदयदेशमभिमृशति । ----- मम हृदये हृदयं ते अस्तु मम चित्तं चित्तेनान्वेहि ममवाचमेकमनाजुषस्व बृहस्पतिष्ट्वानियुनक्तु मह्यं मामेवानुसँरभस्व मयिचित्तानि सन्तुते मयिसामीच्यमस्तुतेमह्यं वाचं नियच्छतात् - इति । ततोनाभिदेशं स्पृशति – प्राणानं ग्रन्थिरसिसमाविस्रसः --- इति। ततस्तामपरेणाग्निं प्राङ्मुखीमुपवेश्य तस्याः पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् कलशस्थाभ्दिः कुरौस्तांमार्जयति --- आपोहिष्ठेति तिसृभिः हिरण्यवर्णाः शुचयः पावका – इति चतसृभिः पवमानः सुवर्जन इत्यनुवाकेनच । ततोवृद्धाब्राह्मणाज्ञातिबान्धवाः सुवासिन्यश्चाशीः पूर्वकं वधूमस्तके ब्रीह्यादिबीजानि यथाचारमारोपयन्ति । याजाता ओषधय इत्यादि मन्त्रैः ॥

ततः कृतस्य विवाहहोमस्य साङ्गता सिद्धये आचार्यादीन गन्धताम्बूलादिना संपूज्य – अस्मे देवासो वपुषे चिकित्सतेत्यादिना तेभ्यश्चाशिषः संप्राप्य प्रमादात्कुर्वतां कर्मेति कर्म साद्गुण्याय विष्णुं स्मरेत् ॥

॥ इति विवाहहोमः ॥

॥ **गृहप्रवेशः** ॥

विवाहहोमानन्तरमेव वधूबांधवाः पितृगृहात्तां भार्यारथाति यानेन भर्तृगृहं प्रापयन्ति । विवाहाग्निं सर्वं एकस्मिन्पात्रे कृत्वा – जायापत्योः पृष्ठतोनुहरन्ति ॥

वरः स्वगृहद्वारं प्राप्य भार्यां संशास्ति । दक्षिणं पादमग्रेति हरदेहलिंमाधिष्ठा इति । सा यथा शासनं दक्षिणं पादं अग्रे कृत्वा देहलिंचानधिष्ठाय गच्छति । ततो गृहपूर्वार्धशालायां सभार्यः प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य मम विवाग्नेर्गृह्यत्व सिद्धिध्वारा श्रीपरमेश्वर प्रीत्यर्थं विवाहाङ्गभृतं गृहप्रवेशनीयाख्यं कर्म करिष्ये इति सङ्कल्प्य गणेश पूजां कृत्वा उद्धननादि भृसंस्कारं विधाय तत्र विवाहाग्निं प्रतिष्ठाप्यापरेणग्निं लोहितमानुडुहंचर्म प्राचीनग्रीवमुत्तरलोमास्तृणाति । तदभावे कुशानास्तीर्य तेषु प्राङ्मुख उपविश्य स्वदक्षिणतोभार्यांच उपवेश्य उदङ्मुखौवोपविशतः । तदापश्चाद्भार्योपविशति । ----- ओं इहगावोनिषीदंन्त्विहाश्वाइह पूरुषाः । इहोसहस्रदक्षिणोपि पूषानिषीदत्विति । ततोनक्षत्रोदय पर्यन्तं वाग्यतौ भवतः ॥

नक्षत्रोदयेसति प्राचीमुदीचींवादिशं गृहान्निष्क्रम्य यस्मिन्देशे ध्रुवदर्शनं भवति तस्मिन्देशे प्राङ्मुख उदङ्मुखोवा भूत्वा वध्वासह दिश उपतिष्ठते ।

ओं देवी: षड्उर्वीरुरुण: कृणोत विश्वेदेवासइहवीरयध्वमिति || ततो नक्षत्राणि | ओं माहास्महि प्रजयामातनृभिरिति || ततश्चन्द्रमसम् | ओं मारधामद्विषते सोमराजन्निति ||

तत: सप्तर्षीन् | ओं सप्तर्षय: प्रथमांकृत्तिकानामरुंद्यतीं येध्रुवताँहनिन्यु: | षट्कृत्तिकामुख्ययोगंवहन्तीयमस्माकं भ्राजत्वष्टमीति |

ततोध्रुवं | ओं ध्रुवक्षिति र्ध्रुवयोनि र्ध्रुवमसिर्ध्रुवतस्थितं ||

त्वं नक्षत्राणांमेथ्यसिसमापाहिपृतन्यत: | नमो ब्रह्मणे ध्रुवायाच्युतायास्तु नमो ब्रह्मण: पुत्राय प्रजापतये नमो ब्रह्मण: पुत्रेभ्यो देवेभ्यस्त्रयस्त्रिँशेभ्यो नमो ब्रह्मण: पुत्रपौत्रेभ्योंगिरोभ्योयस्त्वांध्रुव मच्युतँसपुत्रँसपौत्रं ब्रह्म वेद ध्रुवा अस्मिन्पुत्रा: पौत्राभवन्ति प्रेष्यान्ते वासिनो वसनं कंबलानिकँसँहिरण्यँस्त्रियो राजानोन्नमभयमायु: कीर्तिर्वर्चोयशोबलं ब्रह्मवर्चयमन्नाद्यमित्येतानि मयि सर्वाणिध्रुवाण्य च्युतानि सन्तु | ध्रुवंत्वा ब्रह्मवेद ध्रुवोहमस्मिन्लोकेस्मिँश्च जनपदे भूयासम् | अच्युतं त्वा ब्रह्मवेदमाहमस्माल्लोकादस्माच्च जनपदाच्च्योषि द्विषन्मे भ्रातृव्योस्माल्लोकादस्माच्च जनपदात् च्यवताम् | अचेष्टं त्वा ब्रह्मवेदमाहमस्माल्लोकादस्माच्च जनपदाच्चेष्टिषि द्विषन्मे भ्रातृव्योस्मल्लो-कादस्माच्च जनपदाच्चेष्टतामव्यथमानं त्वा ब्रह्मवेदमाहमस्माल्लोकादस्माच्च जनपदाद्व्यथिषि द्विषन्मे भ्रातृव्योस्माल्लोकादस्माच्च जनपदाद्व्यथताम् || नभ्यं त्वा सर्वस्य वेद नभ्यमहमस्य जनपदस्य भूयासम् | मध्यंत्वा सर्वस्य वेदमध्यमहमस्य जनपदस्य भूयासम् | तंतिंत्वा सर्वस्य वेद तंतिरहमस्य जनपदस्य भूयासम् | मेथींत्वा सर्वस्य वेदमेथ्य महमस्य जनपदस्य भूयासम् | नाभिंत्वा सर्वस्य वेद नाभिरहमस्य जनपदस्य भूयासम् | यथानाभि: प्राणानांविषूवानेवमहं विषूवानेकशतं पाप्मान मृच्चतु योस्मान् न्द्वेष्टियंच वयंद्विष्मो भृयाँसिमामेकशतात्पुण्यान्या गच्छन्तु || इति मन्त्रे र्ध्रुवसुपतिष्ठते || नक्षत्राणाम ????? प्रतिबन्धेना दर्शनेपितस्यांदिश्युपस्थानं कर्तव्यम् | तत?????? मनसा आह्लादकेन वचसा भार्यां संभाष्य???? प्रविशति || इति गृहप्रवेश: |

**|| गृहप्रवेशस्थालीपाक प्रयोग: ||**

अयञ्च नक्षत्रोपस्थानानन्तरं रात्रावेव कार्य: ||

अग्ने: पश्चात् वध्वासह प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य गृहप्रवेशाङ्ग भूताग्नेयस्थालीपाकेन यक्ष्ये इति सङ्कल्प्य | यथाहतद्भसव इति विवाहाग्निं परिसमुह्य परिस्तीर्य अग्निमुत्तरेण कुशानास्तीर्य यथोपयोगं पात्राणिसादयति दर्वीं आज्यस्थालीं चरुस्थालीं प्रोक्षणीपात्रोलूखलमु सलव्रीह्याज्यसंमार्गद र्भोद्धरणपात्रमेक्षण पवित्राद्यासाद्य प्रोक्षणो: सँस्कृत्या सादितानि प्रोक्ष्य उलूखले व्रीहीनोप्य पत्न्यावघात्य प्रक्षाल्योत्तरेणाग्निमासादित

चरुस्थाल्यांतानोप्याग्नौ श्रपयति | मयिगृह्णामीत्यादि प्रसाधन्यै स्वाहेत्यन्तं कृत्वा व्याहृदी भिञ्च हुत्वा शृतं चरुं अभिघार्योदगुद्वास्योद्धरणपात्रेमेक्षणेनोद्ध्याग्नेः पश्चान्निधाय परिषिच्य समिद्ववयात्मकमिध्मंमंक्त्वा तृष्णीमग्ना वाधाय चरुं दर्व्योपहत्य द्विरवदाय जुहोति॥ ---- अग्नये स्वाहा | अग्नय इतं न मम ॥ पुनर्भूयाँसमुपहत्योत्तरार्धस्य पूर्वार्धेजुहोति – अग्नये स्विष्टकृते स्वाहा | अग्नय स्विष्टकृत इदं न मम ॥ ततः इमं मे वरुणेत्यादि प्रजापतेत्यन्तं हुत्वापरिषेक विसर्गं कृत्वा स्थालीपाकशेषेण ब्राह्मणं विद्यावन्तं भोजयेत् ॥ ततः कृतस्य विवाह कर्मणः साङ्गतासिद्धयर्थं आचार्याय वृषभं तत्प्रतिनिधि भूतं हिरण्यं वा दत्त्वा कर्म साद्गुण्याय विष्णुं स्मरेत् |

एकग्रामेचेद्विवाहस्तदाऽऽगारं प्राप्यैव गृहप्रवेशनीय होमः ॥ देशान्तरेचेद्विवाहस्तदा स्वगृहागमनकालेऽग्निरजस्रं प्रागुत्करीत्यानेयः | समारोपणं कृत्वावानेयः | इति गृहप्रवेशस्थालीपाकः ॥

॥ **औपासन होमः** ॥

स च पाणिग्रहणोत्तरं यावज्जीवं नक्षत्रं दृष्ट्वा प्रदोषे वा नवघटि-कात्मकेगौणेपिवाकाले सायं होमः | उषसि पुरोदयं यर्हियदापक्षिणां वांचः प्रवर्तते किलकिलाशब्दः श्रूयते इति यावत | यर्हि वाक् प्रवदेत् | उदिते वा सूर्ये प्रातर्होमः ॥ सायमेवोपक्रम्य सायं प्रातश्च विवाहाग्नौ गौणेपिहोमकाले होमः कार्यः ॥ गृहप्रवेशांतविवाहपक्षे गृहप्रवेशस्थालीपाकाद्र्ध्वमेवस्वकाले होमोपक्रमः कार्यः ॥ होमद्रव्यंतु माषवर्जंकामं व्रीहियवतिलादिकमग्निहोत्रद्रव्यं ग्राह्यम् ॥

अग्नेः पश्चात् प्राङ्मुखः पत्न्या सह उपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य सायं/ प्रातरौपासन होमौ होष्ये इति सङ्कल्प्य अग्निंपरिषिच्य चत्वारि शृङ्गा त्रयो अस्य पादा द्वेशीर्षे सप्तहस्तासो अस्य | त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँआविवेश इति ध्यात्वा एष हि देवः प्रदिशः अनुसर्वाः पूर्वो हि जातः सउगर्भे अन्तः | स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखः तिष्टति विश्वतो मुखः ॥ (सर्वतो मुख) प्राङ्मुखो देव अग्ने मम अभिमुखो भव ॥

अग्निं अलङ्कृत्य | इन्द्राय नमः अग्नये नमः यमाय नमः निरृतये नमः वरुणाय नमः वायवे नमः सोमाय नमः ईशानाय नमः अग्नये नमः आत्मने नमः सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ होष्यामि | व्रीह्यादि द्रव्यं हस्तेन जुहोति | अग्नेये स्वाहा | अग्नय इदं न मम ॥ प्रजापतये स्वाहा | प्रजापतय इदं न मम ॥ भूःस्वाहा | अग्नय इदं न मम ॥ भुवस्स्वाहा | वायव इदं न मम | सुवस्स्वाहा | सूर्याय इदं न मम ॥ भूर्भुवस्सुवस्स्वाहा ॥ प्रजापतय इदं न मम ॥ तथैव परिसमुह्य परिषेक विसर्गं कृत्वा अग्निमुपतिष्ठते | अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् | युयो द्ध्यस्मत् जुहुराणमेनः भूयिष्ठान्ते नम उक्तिं विधेम ॥ अग्नये नमः ॥ मन्त्र हीनं क्रिया हीनं भक्तिहीनं हुताशन | यद्धुतन्तु मया देवा परिपूर्णं तदस्तु ते ॥ प्रायश्चित्तानि अशेषाणि तपः कर्मात्मकानि वै | यानि

तेषां अशेषाणां कृष्णानुस्मरणं परम् । श्री कृष्णाय नमः ॥ अभिवादयो नमस्कारः । औपासन साद्गुण्यार्थं अनाज्ञात त्रय जपं करिष्ये । अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वँहि वेत्थ यथा तथम् ॥ पुरुष सम्तो यज्ञो यज्ञः पुरुष सम्मितः । अग्ने तदस्य कल्पय त्वँहि वेत्थ यता तथम् । यत्वाकल्ला मनसा दीनदज्ञान । यज्ञस्य मन्वाते मर्तासः । अग्निष्टत् होता क्रतुविद् विजानन् यजिष्ठो देवाँऋतुशो यजाति ॥ इदं विष्णुः विचक्रमे त्रेता निधते पदम् । समूढमस्य पाँसुरे ॥

होमान्ते यज्ञेश्वरं ध्यायेत् ॥

बृहत्साम क्षत्रभृत् वृद्धवृष्णियं त्रिष्टुमौजः शुभितं उग्रवीरम् । इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥ इति ॥ भस्माधारये ॥ इति सायं होमः ॥ प्रातर्होमेतु – ओं सूर्याय स्वाहा । सूर्यायेदं न मम ॥ प्रजापतये स्वाहा । प्रजापतय इदं न मम ॥

|| **चतुर्थदिने शेष होमः || (चथुर्थी कर्म)** ||

चतुर्थ्यामपररात्रे अग्निमुपसमाधाय प्रायच्छित्ति पर्यन्तं कृत्वा । नवप्रायश्चित्तिर्जुहोति ॥

चतुर्थस्याह्नस्त्रिभागशेषायां रात्रौ चतुर्थी कर्मकार्यं ॥

वरः वधू सहितः प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य ममास्याः भार्यायाः सोमाद्युपभुक्ति दोष परिहारद्वारा श्री परमेश्वर प्रीत्यर्थं चतुर्थीं कर्म तदङ्गं नव प्रायश्चित्त होमंच करिष्ये तदङ्गं गणेश पूजनं करिष्ये इति सङ्कल्प्य कृत्वा ।

औपासनाग्निं परिस्तीर्य । परिषिच्य । मयिगृह्णामीत्यादि प्रसाधिन्यै देव्यै स्वाहेऽत्यान्तं कृत्वा । व्याहृतीभीश्च हुत्वा । इमं मे वरुण तत्त्वायामि त्वन्नो अग्ने सत्वन्नो अग्ने इति चतस्र आहुतीर्हुत्वा । प्रधान होमे अग्ने प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यैघोरातनूस्तामितो नाशयस्वाहा । अग्नये प्रायश्चित्तय इदं न मम ॥ वायो प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यै निन्दिता तनूस्तामितो नाशयस्वाहा । वायवे प्रायश्चित्तय इदं न मम ॥ आदित्यप्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामितो नाशयस्वाहा । आदित्याय प्रायश्चित्तय इदं न मम ॥ पुनर्व्युत्क्रमेण ॥ आदित्य प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनुस्तामितो नाशयस्वाहा । आदित्याय प्रायश्चित्तय इदं न मम । वायो प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै निन्दिता तनूस्तामितो नाशयस्वाहा । वायवे प्रायश्चित्त्य इदं न मम ॥ अग्ने प्रयश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यैघोरा तनूस्तामितो नाशयस्वाहा । अग्ने प्रायश्चित्तय

इदं न मम ॥ पुनरनुक्रमेण ॥ अग्ने प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यैघोरा तनुस्तामितो नाशयस्वाहा । अग्नये प्रायश्चित्तय इदं न मम ॥ वायो प्रयश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै निन्दिता तनूस्तामितो नाशयस्वाहा । वायवे प्रायश्चित्तय इदं न मम ॥ अग्ने प्रयश्चित्तेत्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यैघोरा तनूस्तामितो नाशयस्वाहा । अग्नये प्रायश्चित्तय इदं न मम ॥ पुनरनुक्रमेण ॥ अग्ने प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यैघोरा तनुस्तामितो नाशयस्वाहा । अग्नये प्रायश्चित्तय इदं न मम ॥ वायो प्रयश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै निन्दिता तनूस्तामितो नाशयस्वाहा । वायवे प्रायश्चित्तय इदं न मम ॥ आदित्य प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनुस्तामितो नाशयस्त्वाहा । आदित्याय प्रायश्चित्तय इदं न मम ॥

नवाहुति होमकाले सँस्रावाज्यं पात्रान्तरेघृत्वा तदेव सँस्रावाज्यं दर्व्या पत्न्यामूर्ध्नि जुहोति । भूर्भगंत्वयि जुहोमिस्वाहा । अग्नय इदं न मम ॥ भुवो यशस्त्वयि जुहोमि स्वाहा । वायव इदं न मम ॥ सुवः श्रियं त्वयि जुहोमि स्वाहा । सूर्ययेदं न मम ॥ भूर्भुवः सुवस्त्विषिंत्वयि जुहोमिस्वाहा । प्रजापतय इदं न मम ॥ इत्याहुति चतुष्टयं मूर्ध्निहुत्वाग्नौ जुहोति ॥ स्विष्टकृतं जुहोति ॥ त्वमग्ने अया सीत्यादिक्रमेण संस्था जपान्तं समाप्य ।

ततः कुंभमुदकपूर्णमग्निसमीपे निधाय अग्निं उदकुंभं च प्रदक्षिणी कृत्यापरेणाग्निं तां भार्यां सम्यगास्तृते पर्यंके प्राक्शिरसं वा शाययित्वा तस्यायोनिं दक्षिणेनपाणिनाभिमृशति । अभित्वापञ्च शाखेनशिवेनाभिद्विषावता । सहस्रेणयशस्विना हस्तेनाभिमृशामसि सुप्रजास्त्वायेति ॥ ततः तस्यायोनौ स्वप्रजननं प्रवेशयति । सन्नाम्नः सँहृदयानि सन्नाभिः संत्वचः । संत्वा कामस्य योक्त्रेण युञ्जान्यविमोचनायेति । ततः तां पर्यालिङ्गयति ॥ मामनुव्रताभवसहचर्यामयाभव । याते पतिघ्नी तनूर्जारघ्नींत्वेतां करोमिशिवात्वंमह्यमेधि क्षुरपविजरिभ्यः ॥ ततोस्यामुखं स्वमुखेन जुषति । मधुहेमघ्विदं मधुजिह्वामेमधुवादिनी । मुखे मे सारघं मधुदत्सुसंवननं कृतम् । चाक्रवाकँसंवननं यन्नदीभ्य उदाहृतम् । यद्युत्कोदेवगंधर्वस्तेन संवनिनौस्वकः (संमनननात् सः )॥ फलदानं दाम्बूलदानं च कृत्वा । ततः ताम्बूल चर्वणञ्च कृत्वा । यथा संप्रदायं पञ्चमेहनि वसन्त माधव पूजाम् करोति ॥ इति ॥ चतुर्थी कर्म ॥

॥ **दर्शपूर्णमासस्थालीपाक प्रयोगः** ॥

तस्यचायं क्रमः ॥ गृहप्रवेशस्थालीपाकानन्तरं पौर्णमासं पर्व यदाभवति तदा पौर्णमास्याः स्थालीपाकः स्वकाले कार्यः ॥ श्रौतभक्तित्वादिष्टिकालोस्यकालः ॥

सपत्नीको गृह्याग्नेः पश्चादुपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य दर्शपूर्णमास स्थालीपाकाभ्यां यक्ष्ये । तत्राद्य पौर्णमास स्थालीपाकेन यक्ष्ये इति

पौर्णमास्यां ॥ पूर्व सङ्कल्पित दर्श स्थालीपाकेन यक्ष्ये इति अमावास्यायामिति सङ्कल्प्य गणेश पूजनादि कृत्वा औपासनाग्नौ हविः श्रपयित्वा । अभिघार्यो द्वास्य । प्रतिष्ठितमभिघार्य । अग्निं परिस्तीर्य । मयिगृह्णामीत्यादि प्रसादिन्यै देव्यै स्वाहेत्यन्तं कृत्वा ॥ व्याहृतीभीश्च हुत्वा । दर्व्यामुपस्तीर्य । द्विरवदाय । सकृदभिघार्य ॥ ओं अग्नये स्वाहा । अग्नय इदं न मम ॥ दर्व्यामुपस्तीर्य । सकृदवदाय द्विरभिघार्य । अग्नये स्विष्टकृतेस्वाहा । अग्नये स्विष्टकृत इतं न मम् ॥ इमं मे वरुणमित्यादि आज्येन हुत्वा । परिषेक विसर्गान्तं कृत्वा ॥ विष्णुं स्मरेत् ॥ इति पौर्णमास स्थालीपाकः ॥ एवमेव दर्शस्थालीपाकः ॥

इष्टिकालः --- पौर्णमासस्थालीपाकः ---- कृष्ण प्रथम दिने ॥ दर्शस्थालीपाकः शुक्ल प्रथम दिने ॥

---

[ रजो दर्शनात्परं :-- त्रिरात्रं मलवद्वाससा ब्राह्मणव्याख्यातानि व्रतानि चरति ॥ च्तुर्थ्यां स्नातां प्रयत वस्त्रामलङ्कृतां ब्रास्मणसम्भाषामाचम्यो पह्वयते ]

**॥ ऋतुशान्तिः ॥**

प्रातः औपासनं कृत्वा – यजमानः कृतमलङ्गलस्नानतिलक आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम धर्मपत्न्याः प्रथम रजोदर्शने अमुक दुष्टमासादि सूचित सकलारिष्ट निरसनद्वारा श्री परमेश्वर प्रीत्यर्थं बौधायनोक्तां ऋतुशान्ति जप होम कर्म करिष्ये इति सङ्कल्प्य तदङ्गं गणपति पूजनं नान्दी श्राद्धं पुण्याहवाचनं च करोति ॥ गोमयेनोपलिप्त भूमौ स्पृष्ट्वा वेदिं कृत्वा ; वेद्युपरि तन्तुवेष्टितं सुद्दढं कुंभं निधाय ; उदकं पूरयित्वा ; कुंभं अलङ्कृत्य ; कुंभे वरुणं आवाह्य ; पुरुषं पुण्डरीकमिध्यात्वा ; बूजां च कृत्वा । अस्मिन् ऋतुशान्ति जप होम कर्मणि ऋत्विजं त्वां वृणे इति ब्राह्मणान् वृवा सर्वेभ्यो नमः ऋतुशान्ति जप होम कर्म कुरुध्वम् ॥ कुर्मः ॥ आचार्यः कुंभमन्वारम्य । ओं नारायणाय विद्महे वसुदेवाय धीमहि । तन्नोविष्णुः प्रचादयात् । इति वैशणवीं गायत्रीं अष्टोत्तर शतं जपुत् ॥ ददन्ते तत्सवितुर्रिति गायत्रीं वेदादिन् अग्निमीळ इत्येकां मृचं इषेत्वोर्जेत्वेत्यनुवाकं अग्न आयाहि वीतयैत्येकां सन्नो देवीरित्येकां जप्त्वापोहिष्ठामयोभुव इति त्रीन् हिरण्यवर्णाः शुचयः पावकाइत्यनुवाकं यददैइत्यानुवाकं पवमानः सुवर्जन इत्यनुवाकं सहस्रशीर्षापुरुषः इत्यनुवाकं ; विष्णुसूक्तं ब्रह्मसूक्तं रुद्रसूक्तं श्रीसूक्तं दुर्गासूक्तं ऋचांप्राचीमहतीदिगुच्यते इत्यनुवाकं च सकृत्पठेत् ॥ ततः कुंभस्योत्तरतः महतितृणमये विष्टरे नववस्त्रकंचुक्यादिनालंकृतयावामभागस्थया पत्न्या सहितं प्राङ्मुखं यजमानं सऋत्विगुदङ्मुख आचार्यः स्थापित कलशोदकं प्रात्रान्तरे गृहीत्वा तत्स्थ पञ्च पल्लवैः कुशादूर्वाभिश्चाशीर्वादपुरः सरं अभिषिञ्चेत् मन्त्रः । ओं । आपोहिष्ठेति तिसृभिः हिरण्य वर्णा इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन सुरास्त्वामभिर्षिचन्तु इति ॥ ततः कलशोदकेनान्येनचोष्णोदकेन तैलाभ्यंग पूर्वकं सस्नातौ दम्पती अभिषेक कालीन वासांसि परित्यज्याहतशुक्लवाससी परिधाय चंदन कुंकुम पुष्पमालादि धारणं कुर्याताम् ।

त्यक्तवासांस्याचार्यायदद्यात् ॥ तत आचार्यो विधिवत्पञ्चगव्यं कृवा यजमान पत्न्यै दद्यात् ॥ साच । यत्त्वगस्थिगतंपापं देहे तिष्ठति मामके । प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥ इति प्राच्याचामेत् ॥ अथाभिषेकानन्तरं पत्न्यासह यजमानान्वारब्ध आचार्यो वेद्याः पश्चिमतः स्थन्डिलं कृत्वा । तत्र भृसंस्काराद्यग्नि प्रतिष्ठापनांतं विधाय स्थापित कुंभस्येशान्यां वेद्यादौ नवग्रहाणां तदधि-देवता प्रत्यधि देवतानांच तत्तन्मन्त्रैरावाहन पूजनादि पूर्वोक्त ग्रहयज्ञरित्या कुर्यात् ॥

ततः लौकिकाग्निं प्रतिष्ठाप्य उल्लिख्य परिस्तीर्य मयिगृह्णामि त्यादि प्रसादिन्यै देव्यै स्वाहा इत्यन्तं कृत्वा व्याहृतीभीश्च हुत्वा प्रधान होमे ॥ विष्णुसूक्तेन विष्णुं अष्टोत्तर शत संख्याकाभिः पलाशसमिदो अश्वत्थ समिदो वा आहुतिभिर्यक्ष्ये ॥ ब्रह्मसूक्तेन ब्रह्माणं अष्टोत्तर शत संख्याकाभिः गृहसिद्धान्नाहुतिभिर्यक्ष्ये ॥ रुद्र सूक्तेन रुद्रं अष्टोत्तर शत संख्याकाभिः आज्याहुतिभिः यक्ष्ये ॥ घृत सूक्तेन प्रत्यचमेकावृत्या आयुष्यदेवतामाज्येन यक्ष्ये ॥ यस्मिन् नक्षत्रे प्रथम रजोदर्शनं तत्तन् नक्षत्रस्य अष्टवाक्यात्मकेन मन्त्रेण अष्टाविंशति संख्याकाभिः समिच्चर्वाज्याहुतिभिर्यक्ष्ये ॥ इमंमे वरुणेत्यादिराष्टभृदन्तं हुत्वा हुतशेष द्रव्येण स्विष्टकृतं जुहुयात् ॥ परिद्यञ्जनादि ब्रह्मोद्वासन पर्यन्तं कृत्वा । स्वाहा अग्निरुपस्थानं करोति ॥

॥ **गर्भाधानम्** ॥

प्रातः औपासनं कृत्वा । सपत्नीको यजमानः आचम्यप्राणानायम्य देशकालावुत्कीर्त्य अस्याः मम भार्यायाः प्रतिगर्भसंस्काराति शयद्वारा अस्यां जनिष्यमाण सर्वगर्भाणां बीजगर्भ समुद्भवैनोनिभर्हणद्वारा क्षेत्र संस्कारद्वाराचाद्यगर्भाधान संस्काराख्यं कर्म करिष्ये ॥ तदङ्गभृतं गणपतिपूजनं स्वस्तिपुण्याहवाचनं नान्दी श्राद्धं पुण्याहवाचनं च करिष्ये । इति सङ्कल्प्य कुर्यात् ॥ पुण्याह जलेन दम्पत्योः प्राक्ष्य ॥

रात्रावौपासनं कृत्वा ॥ यजमानः आचम्य स्वलंकृतां स्वच्छ वस्त्र परिधानां भार्यां सम्यगास्तृते पर्यंके शयनार्थमुपह्वयते नवभिर्मन्त्रैः ॥ ओं विष्णुर्योनिं कल्पयतु त्वष्टारूपाणिपिँशतु । आसिंचतुप्रजापतिर्धाता गर्भदधातुते ॥ १ ॥ गर्भंधेहिसिनीवालिगर्भं धेहि सरस्वति । गर्भं ते अश्विनावुभावाधत्तां पुष्करस्रजौ ॥ २ ॥ हिरण्ययी अरणीयनिर्मन्थतो अश्विना ॥ तं ते गर्भँ हवामहे दशमास्याय सूतवे ॥ ३ ॥ यथाग्निगर्भा पृथिवीद्यौर्यथेद्रेणगर्भिणी । वायुर्यथादिशांगर्भं एवं गर्भं दधामिते ॥ ४ ॥ यस्य योनिं प्रतिरेतोगृहाणपुमान्पुत्रो जायतां गर्भो अन्तः । तं माता दशमासोबिभर्तुसजायतां वीरतमः स्वानाम् ॥ ५ ॥ आते गर्भोयोनिमेतु पुमान्बाण इवेषुधिम् । आवीरो अत्र जायतां पुत्रस्तेदशमास्यः ॥ ६ ॥ करोमि ते प्राजापत्य मा गर्भो योनि मेतुते । अनून पूर्णोजायतामनन्धो श्लोणोपिशाचधीरः ॥ ७ ॥ यानि प्रभृणिवीर्याण्युषभा जनयन्ति नः । तैस्त्वंगर्भिणीभव

सजायतांवीरतमः स्वानाम् | ८ || योवशायां गर्भोयश्चवेहतीन्द्रस्तंनिदधेवनस्पतौ | तेनत्वंगर्भिणीभवसाप्रसूर्धेनुगाभव || ९ ||

तत उपयच्छते || सन्नाम्नः सँहृदयानि सन्नाभिः संत्वचः सन्त्वाकामस्य योक्त्रेण युञ्जान्य विमोचनाय || इति || ततः तां पर्यालिङ्गयति || मामनुव्रता भव सहचर्यामया भव | याते पतिघ्नौ तनूर्जारघ्नीं त्वेताकरोमि शिवात्वं मह्यमेधिक्षुरपविजरिभ्यः | इति || अथाद्यै मुखेन मुखमीप्सते मधु हे मध्विदं मधु जिह्वा मे मधुवादिनी || मुखेमे सारघंमधुदत्सु सवननं कृतम् || चाक्रवाकँसंवननं यन्नदीभ्य उदाहृतम् || यद्युत्कोदेवगन्धर्वस्तेनसंबनिनौ स्वक इति || ततो मन्त्र त्रयेण वारत्रयं रेतो वस्कन्दनं कार्यम् || भूः प्रजापतिनात्यृषमेण स्कन्दयामि वीरंधत्स्वासौ || भुवः प्रजापतिनात्यृषभेण स्कन्दयामि वीरंधत्स्वासौ || सुवः प्रजापतिनात्यृभेण स्कन्दयामि वीरंधत्स्वासौ || अधिकं चेत्तूष्णीमेव यथेच्छमव स्कन्दयेद् || अत्र मन्त्रेषु सर्वत्रासावितिपदं परित्यज्य संबुद्धया संस्कार्यायानाम ग्राह्यम् ||

[आशीर्मन्त्रः || ओं नेष्टः पत्नी मुदानयेत्याहाग्नीदेवनेष्टरि रेतोदधाति वेष्टापत्नियामुद्गा त्रासंख्यापयति प्रजापतिर्वा एष यदुद्गाता प्रजानां प्रजननायाप उपप्रवर्तयति रेत एव तत्सिञ्चत्यूरुणोप प्रवर्तयत्यूरुणाहि रेतः सिच्यते नग्नं कृत्योरुमुपप्रवर्तयति यदाहि नग्न ऊरुर्भवत्यथमिथुनी भवतोथरेतः सिच्यतेथ प्रजाः प्रजायन्ते || ] इति गर्भाधान प्रयोगः ||

|| **पुंसवनप्रयोगः** ||

तृतीयेमासि शुक्लपक्षे पुनर्वसुपुण्याभिजिद्धस्त प्रोष्ठपादनूराधा श्विनीमूलश्रवणरेवतीरोहिणी मृगसंज्ञकान्यतमे पुंनक्षत्रे चन्द्रानुकूल्ये पुंसवनं कार्यं ||

ब्राह्मणान् अनुज्ञाप्य संकल्प्य गणेशपूजनं; पुंण्याहवाचनं उदकशान्ति जपं ; प्रतिसरबन्धनं च कृत्वा नान्दी श्राद्धं पुण्याहवाचनं च कुर्यात् ||

प्राथरौपासनं कुर्यात् || कर्ता प्राङ्मुख उपविश्य दक्षिणतो भार्यांचोपवेश्याचम्यप्राणानायम्य देशकालौ संकीर्त्य मम अस्यां भार्यायां विद्यमान गर्भस्य पुंस्त्व प्रतिपादनद्वाराबीज गर्भसमुद्भवैनोनिबर्हण द्वाराक्षेत्रसंस्कारद्वाराच श्रीपरमेश्वर प्रीत्यर्थं पुंसवनाख्यंकर्म करिष्ये | तदंगं गणपतिपूजनं पुण्याहवाचनं च करिष्ये इति संकल्प्य कुर्यात् |

औपासाग्निमुपसमाधाय परिस्तीर्य परिषिच्य मयिगृह्णामीत्यादि प्रसादिन्यै देव्यायै इदं न मम इत्यन्तं हुत्वा ; व्याहृतीभीश्च हुत्वा || प्रधान होमे || धाता ददातु नो रयि मीशानोजगतस्पतिः | सनः पूर्णेनवावनत्स्वाहा || धात्र इदं न मम || धाता प्रजायाउतरायईशेधा तेदंविश्वं भुवनं जजान | धाता पुत्रं यजमानायदातातस्मा उहव्यंघृतवद्विधेमस्वाहा || धात्र इदं न मम || धाता ददातु नो रयिं प्राचीं जीवातुमक्षिताम् | वयं देवस्य धीमहिसुमतिँसत्यराधसः

स्वाहा ‖ धात्र इदं न मम | धाताददातुदाशुषेवसूनिप्रजाकामायमीढुषेदुरोणे | तस्मै देवा अमृताः संव्ययन्तांविश्वेदेवासो अदितिः सजोषा स्वाहा ‖ धात्र इदं न मम ‖ इति प्रधानाहुति चतुष्टयं हुत्वा | अथांग होमः ‖ इमं मे वरुणतत्वायामीत्यादि प्रजापतेत्यन्तं हुत्वा | एतत् कर्म समृद्ध्यर्थं जयादि होमं करिष्ये इति | चित्तञ्चस्वाहेत्यादि ब्रह्मन्वरन्ते ददामि इत्यन्तं कृत्वा ‖ ब्रह्मणे नमः सकलाराधनैः सुवर्चितम् ‖

देशकालौ संकीर्त्य ममधर्मपत्न्याः पुंसवन कर्मांगं अन्नहोमं करिष्ये | इति सङ्कल्प्य कुर्यात् | ततः पुण्याहवाचनं च कुर्यात् ‖ परिषेक विसर्गं अग्नेरुपस्थानं च कुर्यात् ‖

ततः कर्त्ताऽपरेणाग्निंमुपरिबद्धशुभ्र बर्तृल वितानस्याधोदेशेभार्यां प्राङ्मुखीमुपवेश्य | तस्यादक्षिण हस्ते यवं निदधाति | वृषासीति ‖ ततः सकृदुत्केनमन्त्रेण यवस्य दक्षिणत उत्तरतश्च सर्षपौ निदधाति | आंडौस्थ इति | तदुपरिगावदधिद्रप्सं निदधाति | श्वावृत्तदिति ‖ ततः तूष्णीं प्राशयति ‖ कृत शुद्धाचमनायास्तस्या उदरं हस्ताभ्या मभिमृशति अभिष्ट्वाहं दशभिरभिभृशामि दशमास्याय सूतवै – इति ‖

ततः वटाङ्कुरं प्रपीड्य रसं निष्कास्य घृतेन संमिश्रं कृत्वा कृतस्वोरुमूलोपधानायास्तस्यादक्षिणे नासापुटे तूष्णीं सेचयेत् ‖ ततो विभूतिंघृत्वा ब्राह्मणान् अन्नेन भोजयेत् दक्षिणां दद्यात् ‖

‖ **गर्भस्रावेस्तंभन विधिः** ‖

आद्रेण पाणिना मन्त्रावृत्त्या नाभेरूर्ध्वं त्रिरुन्मार्ष्टि ‖ --- परांचंत्वानार्वांचंत्वष्टाबघ्नातुबंधने| सऋतूनुपवेश्यदशमासोअवीरह – इति ‖

‖ **सीमन्तोन्नयन प्रयोगः** ‖

चतुर्थे मासिषष्ठेष्टमे नवमेवा मासि शुख्लपक्षे रविगुरुशुक्रवारेषु पुनर्वसुपुष्याभिजिद्धस्तप्रोष्ठपदानूराधाश्विनीमूल श्रवणरेवतीरोहिणीमृग संज्ञक पुन्नक्षत्रेषु मध्यपादद्वयेषष्ठ्यष्टमीद्वादशीचतुर्दश्यमावास्यादि व्यति रिक्ततिथौशुभ लग्नादौ कार्यम् ‖

यजमानः कृतावश्यकक्रियः वस्त्राच्छादिते पीठे प्राङ्मुख उपविश्यस्वदक्षिणतः पत्नीमुपवेश्याचम्य प्राणानायम्यदेशकलौ सङ्कीर्त्यममास्यां भार्यायांविद्यमान गर्भस्यबैजिक गार्भिकदोष परिहारद्वारा क्षेत्र सम्स्कारद्वाराच श्रीपरमेश्वर प्रीत्यर्थं सीमन्तोन्नयनाख्यं कर्म करिष्ये ‖ तदङ्गं गणपतिपूजनं पुण्याहवाचनं उदकशान्तिकर्मा प्रतिसर बन्धनं नान्दी श्राद्धं च करिष्ये इति सङ्कल्प्योत्करीत्या कुर्यात् |

ततः औपासनाग्निं प्रतिष्ठाप्य परिस्तीर्य परिषिच्य व्याहृति पर्यन्तं हुत्वा वैशेषिक प्रधान होमे ‖ धातारं चतुराज्येनाङ्गहोमे वरुणं द्विरित्यादि प्रजापतेत्यन्तं हुत्वा

जयादि होमं करिष्ये इति चित्तञ्चेत्यादि ब्रह्मोद्वासन पर्यन्तं कृत्वा त्रिवृदन्न होमं पुण्याहवाचनं च कुर्यात् ॥

ततः तामपरेणाग्निंपूर्ववन्मंडलविधानस्याधो देशेप्राङ्सुखीमुपवेश्य त्रेष्याशलल्यासहोदुंबरस्तबक मुपसंगृह्य तस्याः पुरस्तात्प्रत्यङ्मुख स्तिष्ठन्सीमन्त मुन्नयेत् (ललाठ देशमारम्य केशानुर्ध्वं विभनति) ॥ ओं भूर्भुवः सुवः ॥ राकामहँसुहवाँ सुष्टुतीहुवेशृणोतुनः सुभगाबोधतुत्मना ॥ सीव्यत्वपः सूच्याच्छिद्यमानयाददातु वीरँशतदायमुक्थ्यम् ॥ यास्ते राके सुमतयः सुपेशसोयाभिर्ददासिदाशुषे बसूनि ॥ ताभिर्नो अद्य सुमनाउपागहिसहस्रपोषँसुभगेरराणा ॥ इति द्वाभ्याम् ॥

ततः सीमन्तमभिमन्त्रयति ॥ -- सोम एवनो राजेत्याहुर्ब्राह्मणी प्रजा विवृत्तचक्रा आसीनास्तीरेतुभ्यं गंगे ॥ विश्वा उतत्वया वयं धारा उदन्या इव ॥ अतिगाहेमहिद्विषः - इति ॥ अत्र मन्त्रस्थंगंगा पदंत्यक्त्वा यस्यानद्याः समीपे निवासस्तन्नाम संबुद्ध्यंतंप्रक्षिपेत् ॥

जननकाले क्षिप्रं प्रसवनम् ॥ शिरस्य उदकुंभं निधाय तृष्णीमुदरंस्पृष्ट्वाद्रेणपाणिना नाभेरधस्त्रिरवाङ्गन्त्रावृत्यावमार्ष्टि ॥ - यथैव वायुः पवते यथा समुद्र एजति । एवं ते गर्भ एजतु सह जरायुणा वसर्पतु – इति ॥

ततो ब्राह्मण भोजनं भूयसीं दक्षिणां च सङ्कल्प्य दद्यात् ॥ तत आशिषो वाचयित्वा कर्म साद्गुण्याय विष्णुं स्मरेत् ॥

--------------- &&&&&------------